Barcode : 99999990077669
Title - Rasalochanam
Author - Sharma, Dr. Brahmanand
Language - sanskrit
Pages - 144
Publication Year - 1985
Barcode EAN.UCC-13
9 999999 007766

DUE DATE SLIP

GOVT. COLLEGE, LIBRARY

KOTA (Raj)

Students can retain library books only for two weeks at the most

BORROWER'S No	DUE DTATE	SIGNATURE

Advanced Research Project Approved By U G C

Reassessment of Rasa Theory

रसालोचनम्

By

Dr Brahmanand Sharma

Ex-Director Rajasthan Oriental Research Institute

&

Principal Investigator

Department of Sanskrit

University of Rajasthan

Jaipur

With English Translation

By

Dr B N Sharma (author)

&

Dr Prabhakar Shastri

Sahityacharya, M A Ph d, D Litt

Associate Professor of Sanskrit

University of Rajasthan

Jaipur

26 January, 1985

Distributed by .

Champa Lal Ranka & Co.

Dhamani Market, Chaura Rasta

JAIPUR 302 003

©

Publisher
Dr B N. Sharma
7-Ka-15 Jawaharnagar
JAIPUR (India)

All rights reserved First Edition

Price Rs 60 00

Book available at
Chowkhamba Sanskrit Pratishthan
38 U A Jawaharnagar,
Bungalow Road,
Delhi—110 007

Chowkhamba Vidya Bhavan
Post Box No 1069, Chowk
Varanasi–221 001

Printed at
Anuj Printers,
2168, Maniharon Ka Rasta
Jaipur

रसालोचनम्

रचयिता

डा० ब्रह्मानन्द शर्मा

भू० पू० निदेशक

राज० प्राच्यविद्याप्रतिष्ठानम्

26 जनवरी, 1985

Published works
of
Dr. B. N. Sharma

1. Sanskrit Sahitya men Sadrsya moolaka Alankaron Ka Vikasa Ph d thesis
2. Vastvalankaradarsanam (Sanskrit)
3. Abhinavarasamimansa (Sanskrit)
4. A critical study of Indian Poetics
5. Kavyasatyaloka (Sanskrit)
6. Tattvasatakam (Sanskrit)

Preface

In the present age much useful work has been done by scholars like Dr S K De, Dr V Raghavan etc in the field of Sanskrit Poetics Most of this work is of a descriptive, comparative and explanatory nature with analysis interspersed here and there Inspite of this, there can be no denying the fact that little new has been added to the rich treasure of Sanskrit Poetics with the result that scholars are often apt to remark that Sanskrit Poetics today stands where it was in the days of Panditaraja Jagannatha In the West and in the communist world, Poetics is making big strides in the present era In the circumstances it would have been in the fitness of things for us to carry forward the rich heritage of Sanskrit Poetics and to bring it at par with the modern trends prevailing in the world Dr Rewaprasad Dwivedi has certainly introduced some new ideas in his work entitled *Kavyalankarakarika* and thus has added something to the richness of Sanskrit Poetics I too, have made an humble attempt in my works entitled काव्यालङ्कारदर्शनम् ध्वनितत्त्वसमीमांसा and काव्यसत्यालोक to add something to Sanskrit Poetics Still much needs to be done

The present work, *Rasalocanam*, is the result of the findings of my Advanced Research Project entitled 'Reassessment of Rasa Theory' approved by the U G C for a period of three years I am very much grateful to the U G C for the financial assistance rendered by it towards the above project during this period The findings are now being placed before the scholars on Poetics all over the world for their valuable comments so that the same may help me in my further work in the field of Sanskrit Poetics

The work is written in Sanskrit in original karikas with a Vrtti thereon from my side

A translation in English is added for those who donot have access to Sanskrit language Dr Prabhakar Shastri, my student and Associate Professor of Sanskrit in the University of Rajasthan deserves my thanks for extending his help in respect of this translation My thanks, are due to Anuj Printers also which took keen interest in printing the work so nicely

Brahmanand Sharma

विषय सूची

प्रथम उद्योत

सत्यनिरूपणम्

	पृष्ठांक
प्रकृतिगत सत्यम्	6
प्राणगत सत्यम्	7
हृदयगत सत्यम्	8
आध्यात्मिक सत्यम्	9
संस्कृतकाव्यशास्त्रे काव्यस्य लोकसत्येन	11
सह सम्बन्ध —	
शब्दार्थयोः साहित्यस्य विवेचनम्	15

द्वितीय उद्योत

रससमीक्षणम्

भावविवेचनम्	24
आकर्षणसम्बन्धिनो भावा	26
विकर्षणसम्बन्धिनो भावा	26
भावा द्विविधा —वर्गगता व्यक्तिगताश्च	31
सर्वे भावयोग	33
साधारणीकरणम्	33

तृतीय उद्योत

रसवैशिष्ट्यादिसमीक्षणम्

रसस्य सुखात्मकत्वादिविवेचनम् 42

चतुर्थ उद्योत

शृंगारादिरससमीक्षणम्

वीररसरूपा सत्यानुभूति 48

करुणरसरूपा सत्यानुभूति 49

रौद्ररसरूपा सत्यानुभूति 49

शृंगाररसरूपा सत्यानुभूति 49

वात्सल्यरसरूपा सत्यानुभूति 50

हास्यरसरूपा सत्यानुभूति 50

बीभत्सरसरूपा सत्यानुभूति 51

भयानकरसरूपा सत्यानुभूति 51

अद्भुतरसरूपा सत्यानुभूति 51

शान्तस्य रसत्वविवेचनम् 52

भक्तेः रसत्वविवेचनम् 53

पञ्चम उद्योत

रसगतदोषसमीक्षणम्

असत्यताप्रतीति 56

सत्यगता स्थूलता 56

सत्यगतसूक्ष्मताया न्यूनता 57

स्फुटताविरह 57

English Translation 1 to 78

प्रथम उद्योत

सत्यनिरूपणम्

श्रमं तु प्रथमं वन्दे, श्रमिकञ्च ततः परम् ।
श्रम-श्रमिकरूपेण, प्रतिष्ठा जगतो मता ॥ १ ॥

ध्वनिकारं नमस्कृत्य, ध्वन्यालोकप्रसारिणम् ।
विद्याधरप्रसादेन, रसालोकं करोम्यहम् ॥ २ ॥

न ममालौकिकी प्रज्ञा, वाचि न चास्ति पाटवम् ।
आभासे मे न विश्वासः, सत्यं हि शरणं मम ॥ ३ ॥

सत्यं प्रियं हि सर्वस्य, सौक्ष्म्येणास्य प्रकृष्टता ।
शास्त्रे ज्ञानमिदं प्रोक्तम्, काव्येऽनुभूतिरिष्यते ॥ ४ ॥

सत्यं सर्वेषामभीष्टमिति काव्येऽप्यस्य स्थितिः । काव्यगतमेतत्सत्यं न हि भौतिकमपितु ज्ञानरूपम् । ज्ञानस्य चास्य न हि स्वतो ज्ञानरूपता अपितु विषय-सम्बद्धस्य तस्य ज्ञानरूपतेत्यस्मिन् ज्ञाने पदार्थानां ज्ञानविषयत्वेन स्थितिः । ज्ञानविषय-त्वमापन्नेष्वेषु पदार्थेषु सूक्ष्मतां प्रयातेषु प्रभावकारिताया आविर्भावः । भौतिकपदार्थाना-मुदाहरणेनास्य समर्थनम् । भौतिकपदार्थास्त्रिविधाः कठोररूपाः, द्रवरूपाः, वाष्परूपाश्च । कठोररूपाद् द्रवरूपस्य प्राप्तिर्द्रवरूपाच्च वाष्परूपस्य प्राप्तिः । यथा—जलं पूर्वं हिमरूपम्, ततो द्रवरूपम्, ततश्चोष्णतायोगेन वाष्पत्वाप्तिः । एष भौतिकप्रक्रियादृष्ट्या सूक्ष्मता-प्राप्तेः प्रकारः । अनेन प्रभावकारिताया अतिशयः । ज्ञानविषयत्वमापन्नेषु पदार्थेषु या सूक्ष्मता सा ज्ञानप्रक्रियादृष्ट्या, परमेषाऽपि सूक्ष्मतेत्यत्रापि प्रभावकारिताया आविर्भावः । एषा प्रभावकारितैव काव्ये चमत्कारः । स च चित्तगतो वेगः । अनेन चमत्कारे तत्त्वद्वयम्-एकं सत्यगता सूक्ष्मता अपरतश्च चित्तगतो वेगस्तद्गता तीव्रताप्रतीतिर्वा । एषा तीव्रताप्रतीतिरनुभूतिरूपेति काव्ये सत्यानुभूतिरिति वक्तुं शक्यम् ।

विज्ञानादिष्वपि सत्यगताया सूक्ष्मताया स्थिति । परमेषा बुद्धिप्रयत्नेन जन्या । एष च बुद्धिप्रयत्नो विरुद्धशक्तिरूप (Opposite force) इति तत्र चमत्काराभाव । सत्योन्मुखतानन्तरं विज्ञानादिषु बुद्धिप्रयत्ने शिथिलतां गते यत्र मुहूर्तं सत्यगताया सूक्ष्मताया प्रतीतिस्तत्र चमत्कारोऽपि सम्भाव्यते । काव्ये सत्यगताया सूक्ष्मताया सहृदयस्य समक्ष स्वत एवोपस्थितिरिति तत्र प्रयत्नस्यानपेक्षा । अत्र च कारणं कविप्रतिभैव ।

किञ्च काव्ये विज्ञाने च सत्यानुभूत्योर्विषयदृष्ट्याऽपि भेद । काव्ये सत्यानुभूतिर्लोकसंवादायत्तेति लोकसंवादस्य तत्र विषयत्वेनोपस्थिति । विज्ञाने सत्यानुभूतिर्भौतिकतत्त्वान्वेषणायत्तेति भौतिकतत्त्वाना तत्र विषयत्वेनोपस्थिति ।

आध्यात्मिकानुभूतावपि सत्यानुभूते सद्भाव । परमत्र न हि लोकसंवादस्य अपितु भौतिकेतरतत्त्वाना विषयत्वेनोपस्थिति । किञ्चात्र चेतनागताया स्वरूपोन्मुखताया प्राधान्यम् । काव्यगतसत्यानुभूतौ चेतनागता स्वरूपोन्मुखता यथाकथञ्चिद् विद्यमानाऽपि अप्रधानैव । अपरञ्चाप्रधानाऽप्येषा चेतनागता स्वरूपोन्मुखता लोकसंवादरूपसत्यसूक्ष्मताया माध्यमेन जन्या आध्यात्मिकानुभूतौ पुनश्चेतनाया स्वरूपोन्मुखता तदेकोन्मुखताया एव परिणाम । किञ्च आध्यात्मिकी अनुभूति साधनायत्तेति तस्या स्थायित्वम् । न हि काव्यगताया सत्यानुभूतावेतत्सम्भाव्यते ।

अपरञ्च काव्यगतसत्यानुभूतौ मूर्तिमत्ताया अतिशय । आध्यात्मिकसत्यानुभूतौ मूर्तिमत्ताया अभावोऽनतिशयो वा । विज्ञानादिष्वपि सत्यानुभूतौ मूर्तिमत्ताया अभाव । काव्यगतसत्यानुभूतेर्मूर्तिमत्तातिशयस्याय हेतुर्यदत्र पात्रादियोग । अत एव काव्यस्य कविसृष्टिरिति व्यपदेश ।

सत्यानुभूतिरेषा यथार्थानुभूतिरपि वक्तुं शक्यते । यथा—

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टि ,
पश्चार्धेन प्रविष्ट शरपतनभयाद् भूयसा पूर्वकायम् ।
दर्भैरर्धावलीढै श्रमविवृतमुखभ्रंशिभि कीर्णवर्त्मा,
पश्योदग्रप्लुतत्वाद्वियति बहुतर स्तोकमुर्व्यां प्रयाति ॥

—अभिज्ञान —

अत्र धावतो भयभीतस्य मृगस्य सूक्ष्मधर्माणा वर्णनम् । अनेन कियद् यथार्थं सत्य वा एतद्वर्णनमित्यत्र यथार्थानुभूति सत्यानुभूतिर्वा ।

यथार्थतानुभूतिरेषा यथार्थताया यथार्थताबोधाच्च भिद्यते । यथा—
"गोरपत्य बलीवर्दस्तृणान्यत्ति मुखेन स ।"

अत्र यथार्थताया सत्ता निर्विवादा । पर वर्ण्यधर्माणा सूक्ष्मताभावेनात्र यथार्थतानुभूतेरभाव ।

'गोपुच्छ हस्तद्वयपरिमाण, जटिलस्तदन्तभागश्च द्वादशागुलिपरिमाण ।'

अत्र गोगतधर्मेषु यथार्थताया प्रतीतिर्बुद्धिप्रयत्नजन्येत्यत्र यथार्थतानुभूतेरभाव ।

अनेनैतत्स्पष्टं यत्सत्यानुभूत्या तत्त्वद्वयमस्ति-सत्य तद्गता सूक्ष्मता च । अत्र सत्य प्रथम निरूप्यते ।

लोको मूल हि सत्यस्य, लोके सत्य प्रतिष्ठितम्,
लोकाधारस्ततो रक्ष्यः, कविनाऽभिनिवेशिना ॥ ५ ॥
लोकसत्येऽनुरागश्चेत् काव्यस्य रसनीयता ।
तत्रैव तदभावे च, तस्य नीरसता मता ॥ ६ ॥

काव्यगतमेतत्सत्य लोकसम्बद्धम् । एतच्चेत्थम्-काव्ये सत्यस्यास्य कविप्रतिभयोपस्थापनम् । कविप्रतिभायाश्च लोको विषय इति लोकादेव कविना अस्य सत्यस्य ग्रहणम् । लोकादस्य सत्यस्य ग्रहणे न हि कविनिष्ठोऽनुकरणात्मको व्यापारोऽस्माक सम्मत । यतोऽस्य हेतुर्यदनुकरणे वस्तुनस्तटस्थानुसरणम् । अत्र पुन प्रतिभागम्यस्य लोकसत्यस्यात्मसात्करणम् । आत्मसात्कृतस्यैव चास्य प्रकाशनम् ।

अनेनैव हेतुना काव्यस्य कविसृष्टिरिति व्यपदेशो विधातृसृष्टिवैलक्षण्येन च तस्योत्कर्ष । पर वैलक्षण्यमेतन्न हि काव्यस्य लोकेन सह सम्बन्धाभावस्य प्रयोजकमपितु लोकाश्रितस्य नवनिर्माणमात्रस्य प्रयोजकमित्यपि स्पष्टम् । ननु कवि प्रजापति स्वयम्भूरिति पदमागिरस्य प्रतिभाजन्याया सृष्टेर्मनोवाञ्छितत्वेन लोकेन सह सम्बन्धाभावसम्भावनेति चेदुच्यते-प्रतिभया लोकगताना तत्सम्बद्धानामेव वा सूक्ष्मरूपाणामुद्भावनसम्भावना । प्रतिभागत दृष्टि सृष्टिरिति पक्षद्वय भवति । तत्र दृष्टिपक्षेण लोकगताना तदनुगताना वा सूक्ष्मरूपाणा कवेः प्रत्यक्षीकरण सृष्टिपक्षेण च तेषामभिव्यञ्जनमिति प्रतिभाजन्यस्य लोकगतत्व तत्सम्बद्धत्व वा स्पष्टमेव । ननु सृष्टिपक्षेणास्मिन्नभिव्यञ्जने रूपनिर्माणमप्यन्तर्भूतमिति चेत् तदपि न सिद्धान्तहानि, यत एतन्निर्माण लोकसम्बद्धमेव । एव

सति कवे सृष्टिस्तस्य मनोवाञ्छितेति यदुच्यते तस्यायमेवाभिप्रायो यत्कविर्लोकान्मनोऽनु-कूलस्योपादानस्य ग्रहणे स्वतन्त्र ।

"अपारे काव्यसंसारे कविरेव प्रजापतिः ।
"यथास्मै रोचते विश्वं तथेदं परिवर्तते ॥
शृंगारी चेत्कविः काव्ये जातं रसमयं जगत् ।
स एव वीतरागश्चेन्नीरसं सर्वमेव तत् ॥"

— ध्वन्यालोक

इत्यस्य श्लोकोऽनयैव रीत्या ग्राह्य । अत्रान्तिमस्य पंक्तिद्वयस्यायमेवार्थ प्रतीयते यद् यदि शृंगाररसस्य चित्रणे कवेरभिनिवेशस्तर्हि स तदनुकूलमेवोपादानं लोकाद् गृह्णातीति तस्य काव्यस्य सरसता । परं यदि स वीतरागस्तर्हि लोकगतेषु पदार्थेषु तस्यारुचिरिति लोकसम्बन्धरहितस्य तस्य काव्यस्य नीरसता । अत्र तृतीयपङ्क्तौ शृंगारीति पदं सीमितार्थमिति अन्तिमस्य पंक्तिद्वयस्य निम्नाङ्कितं परिवर्तनं युक्तियुक्तम्—

लोकसत्ये रुचौ सत्यां जातं रसमयं जगत् ।
तत्रैव रुच्यभावे च नीरसं सर्वमेव तत् ॥

ननु 'नियतिकृतनियमरहिताम् ह्लादैकमयीमनन्यपरतन्त्राम्' इति मम्मट कृतायां कारिकायां कविसृष्टेरनन्यपरतन्त्रत्वेनोपादानमिति तस्या लोकाश्रयत्वानुपपत्तिरिति चेदुच्यते—'परमाण्वाद्युपादानकर्मादिसहकारिकारणपरतन्त्रा' इति अन्यपरतन्त्रत्वस्य वृत्तिगता व्याख्या । अत्र परमाण्वादीनां विधातु पार्थक्यम् । एतच्च पार्थक्यं न हि केवलं सृष्टिव्यापारात् प्रागपितु सृष्टिव्यापारकालेऽपि स्थितमित्यतीतकालिकं वर्तमानकालिकञ्चेति उभयकालिकमेतत्पार्थक्यं ज्ञेयम् । अन्यत्वेनात्रैवंविधस्यैव पार्थक्यस्य ग्रहणम् । लोकस्य कवेर्यत्पार्थक्यं तत्केवलं कविव्यापारात् पूर्वकालिकं न तु कविव्यापारकालिकम् । यतः कविव्यापारकाले लोकगतरूपाणां कविना आत्मसात्करणमिति तेषां पार्थक्यस्य समाप्ति । अनेन न हि लोकस्यानया दृष्ट्या कवेरन्यत्वम् । अन्यत्वाभावेऽत्र लोकः कवेरनन्य इत्येव ज्ञेयम् । एवं सति एतं लोकं या कविसृष्टिराश्रयते सा न हि अन्यपरतन्त्रा अपितु अनन्यपरतन्त्रेत्यायातम् । अनेन अनन्यपरतन्त्रत्वस्य न हि लोकाश्रयत्वेन कश्चन विरोध इति पर्यवसितम् ।

अपरञ्च न हि लोकः परमाण्वादिवद् भौतिकेन रूपेण कविसृष्टेराश्रयोऽपितु ज्ञानविषयत्वरूपेण, अस्य च रूपस्यावतारणे कवि स्वतन्त्र इति न हि लोकाश्रयत्वस्य अनन्यपरतन्त्रत्वेन कश्चन विरोध ।

ननु विधातृसृष्टिर्नियतिकृतनियमैर्युक्ता, कविसृष्टिश्च तै रहितेति मम्मटस्याशय इति कथं कविसृष्टेर्लोकाश्रयत्वसम्भावना। अत्रोच्यते—'दैवं दिष्टं भागधेयं भाग्यमित्येते नियतिशब्दस्य सामान्यत कोषगता अर्था। अनेन मम्मटकृतस्य कारिकांशस्यायमर्थो यद् विधात्रा अदृष्टं दैवं वा अनुपेक्षमाणेनात्र पुरुषादिनिर्माणम्। एतच्च युक्तियुक्तमेव। परं कविना स्वसृष्टौ पात्रादीनां यदवतारणं तत्र न हि अदृष्टं हेतुरपितु लोकगतं तेषां स्वरूपम्। अनेन कविसृष्टेर्लोकाश्रयत्वमक्षतम्।

मम्मट काश्मीरवास्तव्य इति काश्मीरशैवदर्शनगत पारिभाषिकोऽप्यर्थो नियतिशब्दस्य सम्भाव्यते। स चेत्थम्—

नियतिर्योजनां धत्ते विशिष्टे कार्यमण्डले।

—तन्त्रालोक

यास्य स्वतन्त्रताख्या शक्ति सङ्कोचशालिनी सैव।
कृत्याकृत्येष्ववशं नियतमम् नियमयन्त्यभूत्रियति॥

—तन्त्रालोक

अनेन कर्तृत्वनियामिका कार्यकारणभावशक्तिर्नियतिरिति फलितम्। कवौ अस्य नियामकतत्त्वस्याभाव इति न हि तस्य सृष्टेर्लोकाश्रयत्वसम्भावना। अत्रोच्यते—कवौ कर्तृत्वनियामकतत्त्वस्याभावेनैतदेवाभिप्रेतं यत्स्वप्रतिभाबलेन लोकगतानां रूपाणामवतारणे स स्वतन्त्र इत्यस्य स्वातन्त्र्यस्य न हि काव्यगतलोकसम्बन्धेन कश्चन विरोध।

ननु निरङ्कुशाः कवय इति लोकनियमात्मनामङ्कुशानामभावे न हि तत्कृतस्य काव्यस्य लोकसम्बन्धसम्भवनेति चेदुच्यते कवयो लोकनिष्ठा न तु आत्मनिष्ठा इति लोके तेषां स्वतोऽव्याहतञ्च प्रवृत्ति। अनेन च लोकगतानां नियमानां न हि तस्य कृते अङ्कुशता अपितु स्पृहणीयतेति स्पष्टम्।

ननु काव्ये प्रस्तुतमप्रस्तुतञ्चेति विधान द्विविधम्। तत्र प्रस्तुतस्य तु लोकसत्येन सह सम्बन्ध सम्भवति। परमप्रस्तुतस्य कथमेव सम्बन्ध स्यात्। अत्रोच्यते—अप्रस्तुतस्य विधान प्रस्तुतस्य सम्यक् प्रतिपादनार्थमिति न हि तस्य स्वतन्त्रतया स्थिति।

किञ्च सहृदयान् प्रति सम्प्रेषितस्यैव काव्यस्य काव्यता। सहृदयाश्च लोकवर्तिन इति लोकसम्बन्धाभावे काव्यस्य तत्र सम्प्रेषणाभाव। अनेन च तस्य काव्यत्वहानि।

अपरञ्च कविर्लोकहृदयस्य परीक्षक इति भवतामपि सम्मतम् । काव्यस्य लोकसम्बन्धाभावे मतमेतद्व्याहतं स्यादिति काव्यगतस्य सत्यस्य लोकगतेन सत्येन सह सम्बन्धोऽपरिहार्य ।

लोके तत्त्वद्वयमस्ति—भूतद्रव्य (Matter) मनुष्यश्च (Man) इत्यनयो-र्लोकसत्येऽन्तर्भाव । मनुष्ये पुन प्राधान्येन तत्त्वत्रयम्—प्राण हृदय बुद्धिश्च । अत्र बुद्धे प्रवृत्ति प्राधान्येन भूतद्रव्यं प्रति । अत्र भूतद्रव्य बुद्धेर्विषय इत्येषा प्रवृत्ति-विषयोन्मुखी । अस्या प्रवृत्तेर्लोके प्राधान्यमित्येषा जीवनस्य यथार्थं । एतद्भिन्ना प्रवृत्तिरात्मोन्मुखी । अस्या केवल कादाचित्कत्वमित्यस्या गौणता । इय जीवनस्य केवलमादर्श इति विज्ञेयम् ।

प्राण हृदयञ्चेति यत्तत्त्वद्वय तज्जीवने कर्मण प्रेरकमिति तदनुप्राणिताया बुद्धिप्रवृत्ते. कश्चन विशेष । अत्र प्राणानुप्राणिताया बुद्धिप्रवृत्तेर्यो विषय स प्राणगत सत्य हृदयानुप्राणितायाश्च बुद्धिप्रवृत्तेर्यो विषय स हृदयगत सत्यमुच्यते । इतो भिन्न यल्लोकवर्ति सत्य तत् प्रकृतिगत सत्यमुच्यते ।

प्रकृतिगत सत्यम्—प्रकृतौ वस्तुतस्तेषा सर्वेषा जडपदार्थानामन्तर्भावो येषाम-स्मानभित स्थिति । अनेन प्रकारेणात्र न हि केवल वननद्यादीनामपितु वाष्पयान-यन्त्रालयवायुयानादीनामप्यन्तर्भाव । अत्रैतद्वक्तु शक्यते यद्वाष्पयानादीनि मानव निर्मितत्वेन विकृतिरूपाणीति प्रकृतेस्तेषा बहिर्भाव । परमेतदयुक्तम्, यत उपवनादीन्यपि मानवनिर्मितानि तथापि तेषा प्रकृतावन्तर्भाव । किञ्च सांख्यदर्शनदृष्ट्या अस्मद्दर्शनगता एषा अखिला प्रकृतिर्विकृतिरूपा । तात्त्विकी प्रकृतिस्त्वव्यक्तरूपा । तस्या एव प्रकृते प्रकृतिरिय विकार ।

> "मूलप्रकृतिरविकृतिर्महदाद्या प्रकृतिविकृतय सप्त ।
> षोडशकस्तु विकारो न प्रकृतिर्न विकृति पुरुष ॥"
>
> —सांख्यकारिका

अत प्रकृतिविकृत्यायत्तो भेदोऽकिञ्चित्कर ।

अत्र केचनैतद्वक्तु शक्नुवन्ति यदुपवनादिभिरस्मताम्बन्ध प्रगाढ । न हि स वाष्पयानादिभि सह सम्भवति परमेतदयुक्तम् । यत सम्बन्धस्य प्रगाढता न हि सम्बन्धस्य प्राचीनतामाश्रयते अपितु साहचर्यातिशयम् । वाष्पयानयन्त्रालयादिभिश्च

सह वर्तमानयुगे स माहचर्यातिशय इति तत्र सम्बन्धस्य प्रगाढता। प्राकृतिकेनानेन वर्णनेन सह पशुनगादीना यद्वर्णनं सहायरूपेण तदपि प्रकृनावेवान्तर्भूतम्। अनेन प्राकृतिकेन सत्येन सहास्माक सम्बन्ध ।

प्राणगत सत्यम् —

प्राणा मूल हि लोकस्य, प्राणाश्चैतेऽर्थमास्थिता : ।
अर्थोन्मुखानि भूतानि, तेनार्थस्य परा स्थिति ॥7॥
अर्थस्यास्य श्रमो मूलम्, युक्ताऽस्यात श्रमे स्थिति ।
चित्रं जगति वैषम्यम्, यदश्रमेऽस्य संस्थिति ॥8॥
कुतोऽस्याध्यात्मवादत्वमाभास्य स्फुटा स्थितिः।
आभासमेनमाश्रित्य धनिकैर्धनसंग्रह ॥9॥

प्राणाना धारणाय अन्नजलादीन्यपेक्ष्यन्ते । अत प्राणा बुभुक्षापिपासादिक-मनुभवन्ति । एवंव प्राणानामन्नजलादीनि प्रति प्रवृत्ति । अनया रीत्या एतान्यर्थ-सज्ञकानि । यद्यपि व्यापकदृष्ट्या ज्ञानविषयभूतात्ता सर्वेषामेव पदार्थानामर्थेऽन्तर्भाव, परमत्रास्माभि प्राणधारणायापेक्षितानामेव पदार्थाना कृते अर्थपदस्य व्यवहार । किञ्च प्राणधारणायापेक्षितस्यार्थस्य येन प्राप्ति स्यात्तस्य कृते अर्थपदस्य व्यवहार इति मुद्रादिकस्याप्यत्रान्तर्भाव । एतमर्थं प्रति प्राणाना प्रवृत्तिरिति निर्विवादम् । एषा च प्रवृत्ति सकृद् विधीयमाना न हि विराम भजते अपितु अर्थसचय प्रति तस्या प्रसारो भवति। प्रादावनेनार्थेन प्राणाना तृप्ति, परमतिशयमापन्नेनानेन अहङ्कारेण सह सम्बन्धस्थापनम्। न चास्याहङ्कारस्य कथमपि शम इति तत्सम्बद्धस्यार्थातिशयस्य तद्गताया प्रवृत्तेश्चापि न कापि इयत्ता।

समाजेऽर्थसम्बन्धि एतत्सत्यमार्थिक सत्यमुच्यते। अयार्थ श्रमजन्य । श्रमस्य च स्थिति श्रमिक इत्यर्थस्यापि स्थितिस्तत्रैव युक्तियुक्ता। पर श्रमजन्यस्यार्थस्य तस्यापि विपुलभागस्य स्थितिर्धनिके । सा च तत्र अर्थायत्तेति धनिकस्य धन न तु तद्गत श्रमस्तस्या हेतु । अनेन श्रमिकस्य श्रमानुरूपादर्थाद् वञ्चितत्व धनिकस्य चाधिकार्थप्राप्तिकारित्वम्। इदमेव धनिके श्रमिकाणा शोषणम्। अत्र धनिका शोषका श्रमिकाश्च शोषिता । अनेनैव समाजे वैषम्य सघर्षश्च। एष एव वर्ग-सघर्ष इति विज्ञेयम्। प्राणप्रेरणाजन्येऽस्मिन् सघर्षे प्राणानुगतस्य हृदयस्यापि योग । हृदयञ्च भावभूमिरित्यस्मिन् सघर्षे भावयोगस्याप्युपस्थिति । अनेन सत्येन सहास्माक प्रगाढ सम्बन्ध, अस्य च सत्यस्य समाजे प्राधान्यम्।

हृदयगत सत्यम्—हृदयतत्त्वेन समाजे सम्बन्धाना स्थापना । एते सम्बन्धा प्राधान्येन त्रिविधा —रक्ततत्त्वाश्रिता, साहचर्यतत्त्वाश्रिता मान्यतासाम्याश्रिताश्च । एभि सम्बन्धै समाजे परिवारादिसञ्ज्ञकाना विभिन्नाना समुदायानामुत्पत्ति । एषु समुदायेषु देशरूपस्य समुदायस्य धर्मरूपस्य च समुदायस्य व्यापकतादृष्ट्या महत्त्वम् । देशरूपे समुदाये मान्यतादीना साम्येन सह स्थानविशेषेण योगस्यापि हेतुत्वेन स्थिति । अनेन देशेन सह य सम्बन्ध स राष्ट्रियतापदवाच्य । इय राष्ट्रियताऽपि जीवनस्य यथार्थं, परमस्य प्रभावकारिता अर्थगतयथार्थस्य प्रभावकारिताया न्यूनतरैव । धर्मतत्त्वे यथार्थस्य आदर्शस्य चेत्युभयोर्योग । अस्यापि प्रभावकारिता राष्ट्रियतावद् विज्ञेया । परिवारादिसञ्ज्ञकानामुपर्युक्ताना तत्त्वानामर्थतत्त्वतुलनायामल्पबलीयस्त्वमेव । अत्र चाय हेतुर्यत् प्रथम तु प्राणप्रेरणाजन्यत्वेन अर्थतत्त्वस्य प्राधान्यम् । अपरञ्च सम्बन्धतत्त्वाश्रितेषु परिवारादिषु समुदायेषु न हि सम्बन्धनाशस्य निर्वाह । किन्त्वेतेषु समुदायेषु परस्पर समुदायानामभ्यन्तरे च क्रियाप्रतिक्रियास्तज्जन्यस्य वैषम्यस्य चाविर्भाव ।

अर्थतत्त्वस्य प्राधान्येन प्रवृत्तौ समाजे धर्मतत्त्वस्य या स्थिति सा आवरणरूपैव । अस्मिन्नावरणे धर्मस्यार्थावरणरूपतया स्थिति । अत्र चाय हेतुर्यदत्र प्रवृत्तिदृष्ट्या आर्थिकसत्यस्यैव स्थिति । अतो धर्मस्य तत्रार्थपोषकतया सद्भावो न तु तत्त्वत । एव सति धर्मोऽय न हि धर्मोऽपितु धर्माभास । धर्मेऽपि वस्तुत तत्त्वद्वयम्—मूलतत्त्वं तद्गतबाह्यरूपञ्च । यत्र मूलतत्त्वस्याभाव केवल बाह्यरूपस्यैव स्थितिस्तत्र धर्मस्य धर्माभास इति व्यपदेश । आर्थिकसत्ये शोषण धनाढ्यवर्गकृतमिति धर्माभासस्य स्थितिर्धनाढ्यवर्ग एव । स्थितिरिय द्विविधा—बोधपूर्वमबोधपूर्वञ्च । प्रथमावस्थाया धनाढ्यवर्ग आवरणस्याभिज्ञ इति तेनाभीष्टार्थसाधनाय आवरणस्य बोधपूर्वमवलम्बनम् । द्वितीयावस्थाया धनाढ्यवर्गेण आवरणस्य न हि आवरणरूपत्वेन ज्ञानम्, पर तत्त्वगतदावरणमेवेति विज्ञेयम् ।

इतो भिन्ना धर्मस्य तात्त्विकी अपि स्थिति सम्भाव्यते पर समाजे तस्या विरलतैव ।

अर्थतत्त्वस्य प्राधान्येन प्रवृत्तौ समाजे राष्ट्रियतातत्त्वस्य या स्थिति सापि धर्मवदावरणरूपैवेति विज्ञेयम् ।

इतो भिन्ना राष्ट्रियताया तात्त्विकी अपि स्थिति सम्भाव्यते पर समाजे तस्या विरलतैव ।

समाजे न हि केवल धर्मस्य राष्ट्रियताया्श्च प्रर्थावरणरूपत्वेन स्थितिरपितु ज्ञानस्यापि स्थितिस्तथैव सम्भाव्यते। अथ ज्ञानस्यार्थोन्मुखतयैव स्थितिरित्यत्र ज्ञान न हि ज्ञानमपितु ज्ञानाभास। एष आभास एव आवृत्ति। एवं धर्माभासादिरूपं-विद्यमानमावृतितत्त्वमप्यस्य समाजस्य कोऽपि यथार्थं। परमस्य यथार्थम्य तावत्पर्यन्तमेव स्थितिर्यावदस्य आवरणमगो न स्यात्। सति तु आवरणभङ्गेऽस्याचिरेणैव विलय।

समाजे हृदयतत्त्वस्य प्राणतत्त्वस्य च सयुक्त विवेचनम् —समाजगतेषु समुदायेषु तत्त्वान्तरं मह प्राणतत्त्वस्याप्युपस्थिति। तत्त्वमेनत्तत्त्वान्तरेभ्यो बलीयस्त्यनेन तत्त्वान्तरजन्येषु समुदायेषु परिवर्तनम्। किञ्च तत्त्वान्तरजन्य समुदायगतं वैपम्य तत्त्वान्तर-ह्रासमुखेन एतत्तत्त्वपर्यवसायीति ज्ञेयम्। समाजे मनुष्यस्य कर्मानुष्ठानेन वैपम्यमेतद्यथा घटते यथा चैतदर्थनत्त्वस्य प्राधान्ये पर्यवस्यति तदित्थम्। समाजे प्रत्येक जनस्य निर्दिष्ट स्थानम्। स्थानमेतत्कर्मरूपम्। अनेन कर्मणा मनुष्यस्यार्थप्राप्तिरिति स्थानस्यार्थयोग। समाजगत कर्म नियमविशेषाश्रितम्, परं सम्बन्धानुरोधेनात्र सम्बन्धविशेषस्यापि प्रभाव। अनेन नियमविशेषस्योल्लघन तत्कृतस्य वैपम्यस्य चाविर्भाव। स्थानस्यार्थयोग इति तद्रक्षणाय मनुष्यस्य प्रयास। समाजे सम्बन्धाना प्रभावकारित्वेऽस्मिन् प्रयासक्रमे सम्बन्धाना समाश्रय। अनेन सम्बन्धस्थापने श्रमस्यापव्यय इति कर्मणो हानि। हानेरस्या अपह्नवाय कर्माभासस्यावलम्बनम्। आभास एव आवरणरूप। अनेनावरणेन न हि हानेरावृतत्वमपितु आभासस्य स्पष्टत प्रतीति। किञ्च सम्बन्धस्थापन-प्रयासे पाटवेन सम्बन्धाभासस्यावलम्बनमिति सम्बन्धतत्त्वस्यैव हानि। अस्मिन् सर्वस्मिन् क्रमे अर्थतत्त्वमक्षतमिति सम्बन्धतत्त्वस्य ह्रासमुखेन तस्यैवावशेष।

आध्यात्मिक सत्यम्—आध्यात्मिक सत्यमस्मिल्लोके व्यक्तिविशेषगत न तु समाजगतम्। व्यक्तयश्चाप्येता विरला विरलतराश्च। ननु ब्रह्म सत्य जगन्मिथ्येति चेदुच्यते ब्रह्मनिष्ठस्यैव जनस्य दृष्ट्या ब्रह्मणस्तथात्वम् न त्वितरेषा दृष्ट्या। ते तु लोकनिष्ठा एव। तेनैव च लोकस्य लोकत्वम्। किञ्च समाजेऽत्र आध्यात्मिकसत्यस्य स्थाने अध्यात्माभासस्यैव भूयोदर्शनम्। एतच्चेत्थम्-समाज खलु प्राधान्येनार्थनिष्ठ इति, तद्गतो धनाढ्यवर्गोऽपि तथा। अनेन धनाढ्यवर्गेण श्रमिकवर्गस्य शोषणमेतदेव च तस्य लक्ष्यम्। लक्ष्यमेतदलक्षित स्यादिति तत्रावरणमपेक्ष्यते। आवरणञ्चार्थभिन्नेन अर्थ-विरोधिना वा तत्त्वेन भवितुमर्हति। अत्रार्थभिन्नानि तत्त्वानि सन्ति हृदयतत्त्वाश्रितानि धर्मराष्ट्रियतादीनि अर्थविरोधि च तत्त्वमस्ति आत्मतत्त्वम्। एषु तत्त्वेष्वर्थविरोधिनस्तत्त्वस्य सविशेष प्रभावकारितेति आत्मतत्त्वस्यैवा प्रभावकारिता विज्ञेया। अत्रापि तत्त्वद्वयम्—

मूलतत्त्वं तद्गत—बाह्यरूपञ्च । अत्र न हि मूलतत्त्वमर्थस्यावरणं भवितुमर्हतीति तद्गतबाह्यरूपेणैवार्थतत्त्वस्यावरणं विधीयते । इद बाह्यरूपमेवाध्यात्माभास ।

ननु समाजे भवतु नाम आध्यात्मिकसत्यस्य विरलत्वेन दर्शनम्, एतत्सत्योन्मुख्या प्रवृत्तेस्तु दर्शनमत्र भूयस्त्वेन विद्यत एवेति चेदुच्यते–अस्मिन् समाजे यावत्पर्यन्त यथार्थताजन्यस्य आर्थिकवैषम्यस्य सद्भावस्तावत्पर्यन्त न हि आत्मतत्त्वप्रेरितेन आदर्शवादमात्रेण आध्यात्मिकप्रवृत्ते स्थायित्वस्य प्रभावकारितायाश्च सम्भावना ।

संस्कृतकाव्यशास्त्रे काव्यस्य लोकसत्येन सह सम्बन्ध —

संस्कृतकाव्यशास्त्रे काव्यस्य लोकसत्येन सह सम्बन्ध स्वीकृत । नाट्यशास्त्रगतेन निम्नलिखितेन श्लोकेनैतत्स्पष्ट प्रतिपादितम्—

यानि शास्त्राणि ये धर्मा यानि शिल्पानि या क्रिया ।
लोकधर्मप्रवृत्तानि तानि नाट्य प्रकीर्तितम् ॥

—नाट्यशास्त्रम्

साहित्यशास्त्रगतं औचित्यसम्प्रदायो रससम्प्रदायस्यौचित्यमूलकता चापि एत सम्बन्ध स्थापयत । औचित्यसम्प्रदायानुसार व्यवहारौचित्यमौचित्यस्य प्रमुख प्रकार । एतदनुसार काव्यगतस्य वर्णनस्य लोकव्यवहारेण सह साम्यमपेक्षितम् । अनेनैव तत्रौचित्यस्य प्रतीति । काव्यगतस्य वर्णनस्य लोकव्यवहारेणैतत्साम्यमेव वस्तुत काव्यस्य लोकसत्येन सह सम्बन्धोऽस्ति ।

रससिद्धान्तस्य निरूपणे औचित्यस्य महत्त्व स्पष्टत प्रतिपादितम्—

अनौचित्यादृते नान्यद्रसभगस्य कारणम् ।
प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परा ॥

—काव्यप्रकाश

अनेन काव्यस्य लोकसत्येन सह स्पष्ट सम्बन्ध । किञ्च रसनिरूपणप्रसगे निम्नलिखित कथन महत्त्वपूर्णम्—

कारणान्यथ कार्याणि सहकारीणि यानि च,
रत्यादे स्थायिनो लोके तानि चेन्नाट्यकाव्ययो ।
विभावा अनुभावास्तत्कथ्यन्ते व्यभिचारिण,
व्यक्त स तैर्विभावाद्यै स्थायी भावो रस स्मृत ॥

—काव्यप्रकाश

अनेनैतत्स्पष्ट यद्रसे विभावादिगतमौचित्य लोकव्यवहारानुकूलतामपेक्षते । एषा अनुकूलतैव वस्तुत काव्ये लोकसत्यस्य प्रकाशनमस्ति ।

रूपकलक्षणग्रन्थगत वस्तुनेतृरसविवेचनमपि रूपकस्य लोकसत्येन सह सम्बन्ध प्रतिपादयति ।

सत्यप्येव संस्कृतकाव्यशास्त्रे प्राणतत्त्वाश्रितस्य सामाजिकसत्यचित्रणस्य विधानाभाव.। विधानमेतत्प्राधान्येन वस्तुविवेचने अंशतश्च नेतृविवेचने सम्भवमासीत्। परं वस्तुविवेचने वस्तुन आधिकारिकताया प्रासंगिकतायाश्च, तस्य विकासक्रमस्य तद्गताया सरसताया नीरसतायाश्च विवेचनं कृतम्। अखिलमेतद्विवेचनं वस्तुयोजना तद्गता रसानुकूलतादिकञ्चाश्रयते न तु लोकसत्यानुगामि तद्गतं स्वरूपम्। प्रख्यातादिकस्य वस्तुगतस्य भेदत्रयस्यापि निरूपणे न हि अनया दृष्ट्या स्पष्टीकरणं विहितम्।

नाट्यलक्षणग्रन्थेषु रसविवेचने दृष्टिपातेन प्रतीयते यद्विवेचनमेतद् विस्तृतं पूर्णञ्चास्ति। वस्तुविवेचने न हि एतादृशी स्थिति। तस्यानुषंगिकमिव प्रतीयते। एतच्चालंकारिकैं स्पष्टतः स्वीकृतम्—

सन्धिसन्ध्यंगघटनं रसाभिव्यक्त्यपेक्षया।
न तु केवलया शास्त्रस्थितिसम्पादनेच्छया॥

काव्यशास्त्रग्रन्थानामवलोकनेन प्रतीयते यदालंकारिकाणां दृष्टिर्व्यक्तिपरा आसीत् न तु समाजपरा। अत एव व्यक्तिसम्बन्धिनां भावानां तत्सम्बन्धिनीनां चेष्टानाञ्च तैं सूक्ष्मं सुन्दरञ्च विवेचनं कृतम्, परमेतद्भावादिवशात् समाजस्य यः स्वरूपपरिणामस्तस्य विवेचनस्य गौणत्वं।

अत्र केचनैतद्वक्तुं शक्नुवन्ति यद् व्यक्तिगता भावा स्थायिनः इति तेषां विवेचनं युक्तियुक्तम्। समाजगतानि रूपाणि तु परिवर्तनशीलानीति न हि तेषां विवेचनं भवितुमर्हति। अत्रोच्यते—न हि व्यक्तिगता सर्वेऽपि भावा स्थायिनः, अपितु विकासक्रमजन्या। किञ्च समाजगतेषु रूपेषु परिवर्तनं भजमानेष्वपि प्राणतत्त्वजन्यस्तद्गतः प्रभाव स्थायी एव।

अत्रैतद्वक्तुं शक्यते यत्समाजगतस्यास्य सत्यस्य विवेचनमर्थशास्त्रसमाजशास्त्रादीनां विषय इति काव्यशास्त्रे तस्य विवेचनमयुक्तम्। अत्रोच्यते यद्भावविवेचनमपि मनोविज्ञानस्य विषय, तथापि रसविवेचने तस्य रसोपयोगिनी स्थितिरिति समाजशास्त्रादीनामपि विषयस्य काव्यशास्त्रगतविवेचने न किमप्यनौचित्यम्।

अत्रैतद्वक्तुं शक्यते धर्मकर्माश्रिता वर्णाश्रमव्यवस्था आलंकारिकमतानुसारं समाजगतसत्यस्य स्वरूपम्, तदनुसारञ्च नायकादीनां निर्देशोऽस्त्येव। अत्रोच्यते—यत्प्राणतत्त्वाहंकारतत्त्वजन्येन प्रभावेणास्या व्यवस्थाया यो वैषम्यात्मिकाविस्तरस्तस्यापि विधानमपेक्षितम्।

एतत्तु सत्यं यन्नाट्यलक्षणग्रन्थेषु न हि समाजगतस्य भर्याश्रितवैषम्योपादानस्य कश्चन विरोधः, न च श्रमिकस्य श्रमिकवर्गस्य नेतुर्वा तत्र प्रमुखपात्रत्वेनोपादानस्य कश्चन निषेधः। काव्यस्य लोकचित्रणरूपेण ग्रह इत्येवंविधचित्रणेऽन्तर्भूतस्य अर्थजन्यवैषम्योपादानस्य परिहाराशंकैव तत्र नोदेति, प्रमुखपात्रत्वेनोपादानस्य पुनर्यो विषयस्तस्य कृते नायकस्य सामान्यगुणानां विवेचनमत्रापेक्षितम्। तच्चेत्थम्—

नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः।
रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा॥
बुद्ध्युत्साहस्मृतिप्रज्ञाकलामानसमन्वितः।
शूरो दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः॥

—दशरूपकम्

एषु गुणेषु न हि कोऽपीदृशो गुणो यस्य स्थितिः श्रमिके श्रमिकवर्गस्य नेतरि वा न सम्भवेत्। धार्मिक इत्येवंरूपो यो गुणोऽत्रान्ते उपात्तस्तस्य तु श्रमिके निर्विवादा स्थितिरिति वक्तुं शक्यम्। तच्चेत्थम्—धर्मं चरतीति धार्मिकः इत्यस्य पदस्य व्युत्पत्तिः। धर्मश्च कर्तव्यापरपर्याय इति कर्तव्यपालकः इत्यस्य पदस्यार्थः। श्रमिकश्च श्रमरूपं स्वकर्तव्यं पालयत्येव अन्यथा तस्य स्वरूपस्यैव हानिः स्यादिति श्रमिकस्य धार्मिकत्वं तद्रूपान्न पार्थक्यं याति ज्ञेयम्।

महाकाव्यानामपि लक्षणेनैतत्प्रतीयते यच्छ्रमिकादीनां न हि नायकत्वश्रेण्यास्तत्र बहिर्भावः। महाकाव्यस्य लक्षणमेवं कृतम्—

सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः।
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः॥

अत्र 'सुरः' इति पदस्य नायकविशेषणत्वेनोपादानम्। सुरासुररूपञ्च विभाजनं वृत्त्याश्रितं न तु अर्थाश्रितमिति विभाजनेऽस्मिन्नर्थस्य गौणताधानेन न हि श्रमिकस्य नायकत्वोपादाने कश्चन विरोधः। किञ्च 'सद्वंशः' इति पदस्यात्र क्षत्रियविशेषणत्वेनोपादानम्। सद्वंशत्वञ्च वृत्त्याश्रितमिति न हि श्रमिकस्य नायकत्वोपादाने कश्चन विरोधः।

सत्यप्येवमेषु ग्रन्थेषु अर्थाश्रितवैषम्यस्य श्रमिकवर्गस्य च विशिष्टरूपेणोपादानस्य योऽभावः स चिन्त्य एव।

संस्कृतमहाकाव्येषु नाटकेषु चापि समाजगतस्यार्थिकवैषम्यस्य चित्रणं न्यूनमेवावलोक्यते । अत्रानेकानि कारणानि भवितुमर्हन्ति —

अत्रैकमेतत्कारणं यत्तेषां च महाकवीनां नाटककाराणाञ्च समये भारतदेशः सुखी समृद्धश्चासीदिति तत्र आर्थिकवैषम्यस्याभाव आसीत् ।

अपरञ्चैतत्कारणं यत्संस्कृतकवयः प्रायेण राजाश्रिता इति पीडितजनजीवनेन तेषां सम्बन्धाभाव आसीत् ।

अत्र केचनैतद्वक्तुं शक्नुवन्ति यद् भारतीयसमाजे आध्यात्मिकतायाः प्रभावेण अर्थोन्मुखता भौतिकता वा नियन्त्रिता आसीदिति तज्जन्यस्य वैषम्यस्याप्यभाव आसीत् । अत्रोच्यते यदध्यात्मपरकभारतीयदर्शनानुसारमिन्द्रियाणामर्थोन्मुखता जीवनगतं सत्यमिति तज्जन्यायाः भौतिकतायाः न हि अपलापसम्भावना । किञ्च भारतीयसमाजे अर्थोन्मुखप्रवृत्तिजन्यस्य आर्थिकवैषम्यस्याभाव इत्येषा न हि तात्त्विकी स्थितिः । अत्र सत्यामप्यर्थपरायां प्रवृत्तौ आध्यात्मिकतायाः प्रभावेण भारतीयसमाजे दयादानादिमूल्यान्यक्षुण्णानीति अर्थाश्रितवैषम्यस्य तीव्रताभाव इति यस्तर्कः प्रस्तूयते तत्राप्यंशतः सत्यता यतः आध्यात्मिकतायाः शिथिलतां गतायामेतानि दयादानादीनि भौतिकतायाः आवरणमात्राणि सञ्जातानि । आवृता चैभिर्भौतिकता अनावृताया अपि भौतिकतायाः भयङ्करतरा आसीत् ।

अत्रैकमेतदपि कारणं भवितुमर्हति यदध्यात्ममूलस्य कर्मवादस्य लोकप्रचलितां भौतिकतापरामतिव्याप्ताञ्च व्याख्यामनुसृत्य भारतीयसमाजे श्रमिकवर्गेण स्वनिर्धनतायाः धनिकधनिकतायाश्च पूर्वजन्मकृतकर्मणां परिणामरूपेण ग्रह इति सत्यप्यार्थिके वैषम्ये तज्जन्यसंघर्षस्य स्थाने भाग्यवादस्योदयः सञ्जातः । अत्रोच्यते यत्तर्कस्यास्यांशतः पूर्णतो वा सत्यत्वेऽपि समाजगतस्यार्थिकवैषम्यस्य चित्रणमपेक्षितमेवासीत् ।

शब्दार्थयो साहित्यस्य विवेचनम् —

सत्यमर्थगतं काव्येऽर्थे च शब्दस्य संस्थितिः ।
शब्दार्थयोर्हि सद्भावादस्य साहित्यरूपता ॥१०॥

काव्येऽस्य सत्यस्योपस्थितिरर्थरूपेण भवतीत्यर्थं काव्यस्य स्वरूपम् । अर्थश्चैष शब्दगम्यस्तदनुस्यूतश्चेति शब्दोऽपि काव्यस्य स्वरूपम् । अनेन प्रकारेण शब्दस्यार्थस्य चेत्युभयो काव्यस्वरूपतेति साहित्यमित्यस्यान्वर्था सज्ञा

शब्दः काव्यद्बहिर्भूत एतद् द्विवेदिनां मतम् ।
शब्दरूपविचारे हि काव्ये तन्नोपपद्यते ॥११॥

अत्र डा० रेवाप्रसादद्विवेदिमहाभागा कथयन्ति यन्नहि शब्दस्य काव्यस्वरूपेऽन्तर्भाव । अत्र शब्देन किं तात्पर्यमिति तावत्प्रथम विचारणीयम् येन काव्यस्वरूपेणास्य सम्बन्धनिर्णय, स्यात् । शब्दस्यैक कार्यमस्ति स्वोच्चारणरूपतया प्रस्तुतभावानुकूलस्य कठोरताकोमलतादिकस्य प्रस्तुति, अपरञ्च कार्यमस्ति अर्थद्योतकता । अस्मद्दृष्ट्या तु काव्ये प्रथमस्याप्युपयोगिता, द्वितीयस्य तु सा सर्वैरेव स्वीकार्या । किञ्च काव्येऽर्थद्योतनानन्तर न हि शब्दस्य पृथग्भावोऽपितु काव्यानुभूतौ तस्य मुहुर्मुहुरुपस्थितिरिति न हि तस्य काव्याद् बहिर्भाव । शास्त्रे स्वर्थद्योतनानन्तर शब्दस्य विराम इति न हि तत्रैतादृशी स्थिति ।

किञ्च काव्ये न हि सामान्यस्यार्थस्योपस्थितिरपितु विशिष्टस्यार्थस्य । अस्य च प्रसङ्गविशेषे उपयुक्तता । एषा उपयुक्तता शब्दजन्या तत्सम्बद्धा चेति सौन्दर्यचित्रेऽस्य शब्दस्यापि समावेश । यथा-स्त्रिया गुणविशेषान् लक्ष्यीकृत्य कान्ताप्रमदादीना शब्दाना प्रयोगेऽर्थविशेषस्योपस्थिति प्रकरणविशेषे च तेषामुपयुक्ततेति तज्जन्ये चारुत्वातिशये एषा शब्दानामपि समावेश स्वीकार्य । कालिदासविरचितेन निम्नलिखितेनोदाहरणेनैतत्स्पष्टम्—

सरसिजमनुविद्धं शैवलेनापि रम्यम्,
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मी तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी,
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥

—अभिज्ञान

अत्र कमलशब्दस्य स्थाने सरसिजशब्दस्य प्रयोग प्रसगदृष्ट्या नास्य प्रयोगस्योपयुक्तता । किञ्च व्याप्त सलग्नमित्यादिशब्दाना स्थाने अनुविद्धमिति शब्दस्य प्रयोग । एष चातीव हृद्य । सन्वीति शब्दस्यापि प्रयोगोऽत्र सार्थक इत्येतच्छब्दजन्ये सौन्दर्यातिशये एषा शब्दानामपि समावेशोऽत्र स्वीकार्य । अपरञ्च समग्रश्लोकगतेऽर्थे शब्दाना स्थानक्रमादिकस्यापि महत्त्वमित्येतज्जन्ये सौन्दर्यातिशये एतदनुपेक्षणीयम् ।

किञ्च कविदृष्ट्या सहृदयदृष्ट्या चेत्युभाभ्यामेव दृष्टिभ्या काव्यस्वरूपे शब्दस्यान्तर्भाव । कविदृष्ट्या दृष्टिरत्र सृष्टिपक्षपरेति काव्ये पक्षद्वयम् । प्रथमोऽनुभूतिरूपो द्वितीयश्चाभिव्यक्तिरूप । न हि एन द्वितीय पक्ष विना काव्यस्य पूर्णता । शब्दस्य चास्मिन्नेव पक्षेऽन्तर्भाव इति तस्य काव्यस्वरूपेऽन्तर्भाव स्वीकार्य ।

क्रोचेमहाभागानामत्र विप्रतिपत्ति । तेषा मतानुसारमभिव्यक्तिरेव काव्यम् । एषा अभिव्यक्तिश्चान्तरिकी अनुभूति । अस्या अनुभूते कृते न हि बाह्यशब्दादियोगस्यपेक्षा —

"When we have mastered the internal word, when we have vividly and clearly conceived a figure or statue, when we have found a musical theme, expression is born and is complete, nothing more is needed What we then do is to say aloud what we have already said within, sing aloud what we have already sung within "

न हि मतमेतद्युक्तियुक्त प्रतिभाति । आन्तरिकी अनुभूति कवेर्व्यक्तिगत वस्तु । न हि अनया सह सहृदयहृदयस्य सम्बन्धसम्भावनेत्यस्या कृते अभिव्यक्तिपरिणामोऽपेक्षित । स च शब्दादिरूप । किञ्चानुभूतिर्न हि उत्पत्तिसमकालमेवाभिव्यक्तिरूपतामापद्यते अपितु तत्कृते शब्दादियोगात्मन कर्मणोऽपेक्षा ।

सहृदयदृष्ट्या शब्दस्यार्थसम्पृक्ततया प्रतीतिविषयत्वाध्यर्थेन सह शब्दस्य काव्यस्वरूपेऽन्तर्भाव स्वीकार्य ।

अभिव्यक्ते काव्यबाह्यत्वसाधनाय डा० द्विवेदिमहाभागा निम्नलिखित तर्क प्रस्तुवन्ति —

> अभिव्यक्तौ नु दुग्धस्य हेतुर्गोपालदारक ।
> किमसौ धेनुभावेन पूज्यते पामरैरपि ॥
>
> —काव्यालकारकारिका

अत्र द्विवेदिमहाभागानुसारं दुग्धस्य कारणं धेनुः, दुग्धाभिव्यक्तेश्च कारणं गोपालदारक इति दुग्धाभिव्यक्तेरपेक्षणीयता ।

अत्रोच्यते—

अभिव्यक्तौ नु दुग्धस्य हेतुरुपस्नुतिः क्रिया ।
नास्या धेन्वा बहिर्भावस्तस्यामस्याः स्थितिर्मता ॥१२॥

दुग्धाभिव्यक्तेः कारणमुपस्नवनक्रिया । एषा च धेनुगतेति न हि अभिव्यक्तेरपेक्षणीयता । अत्र द्विवेदिमहाभागा वक्तुं शक्नुवन्ति यदुपस्नवनक्रियाया अस्या गोगतत्वेऽपि गोपालदारकजन्यता । अत्रोच्यते यदुपस्नवनक्रिया धेनुगतेच्छाजन्येति गोपालदारकस्यात्र बाह्यतैव ।

डा० द्विवेदिमहाभागा आचक्षते यत्काव्यं ज्ञानरूपं शब्दश्च ज्ञानबाह्य इति तस्य ज्ञानरूपत्वाभावेन काव्यस्वरूपताभाव —

काव्यस्य ज्ञानरूपत्वे शब्दत्वं नोपपद्यते ।
शब्दस्य ज्ञानतायां हि शब्दतैव विनश्यति ॥
—काव्यालंकारकारिका

अत्रोच्यते—

काव्यस्य ज्ञानरूपत्वे वैमत्यं न कदाचन ।
बाह्यत्वेन स्थितः शब्दो ज्ञानाकारं प्रपद्यते ॥१३॥
शब्दस्य ज्ञानतायां हि शब्दो यदि विनश्यति ।
अर्थस्य ज्ञानतायां हि नश्येदर्थ इति ध्रुवम् ॥१४॥

काव्यं ज्ञानरूपमिति तु सत्यम् । अस्माभिरपि वस्त्वलंकारदर्शनदीपके स्वग्रन्थे एतदेव प्रतिपादितम्—

यत्र वाच्यत्वस्याभिधाबोध्यत्वरूपत्वात्किं तद्बोध्यार्थत्वमित्युपगम्यते ज्ञानरूपत्वमेव तदित्यस्माकं मतम् ।

—वस्त्वलंकारदर्शनम् पृ० ६

परं न हि अस्य तत्त्वस्य शब्दे काव्यस्वरूपतापादनेन कश्चन विरोधः। तच्चेत्थम्—प्रथमं शब्दो ज्ञानबाह्य इति तस्य ज्ञानाद् भेदः। अथ तस्य श्रोत्रेन्द्रियेण ग्रहणम्। गृहीतस्य चास्य ज्ञानाकारतेत्यस्य काव्यस्वरूपत्वे न काप्यनुपपत्तिः।

किञ्च न्यायमतानुसारं शब्दस्य यद्ग्रहणं तत्र न हि समग्रस्य तस्य बाह्यत्वेन स्थितिरपितु तद्गताः पूर्वपूर्ववर्णाः संस्कारतामापद्यन्ते, केवलमन्तिमस्यैव बाह्यत्वेन स्थितिः श्रवणेन ग्रहणानन्तरञ्चास्यापि ज्ञानाकारताया पर्यवसानम्।

'पूर्वपूर्ववर्णानुभवजनितसंस्कारसहकृतेन अन्त्यवर्णसम्बन्धेन श्रोत्रेणैकदैव पदप्रतीतिर्जन्यते।'

—तर्कभाषा

किञ्च यदि शब्दस्य ज्ञानतायां शब्दताया हानिः स्यात् तदा अर्थस्यापि ज्ञानतायामर्थताया हानिः स्वीकार्या। अर्थश्च घटपटादिपदार्थाः। एतेषां हानौ किं स्यादेतद्विरहितमर्थज्ञानस्य स्वरूपम्। यतो ज्ञानस्य न हि स्वतो ज्ञानरूपता अपितु विषयसम्बन्धित्वेनैव ज्ञानरूपता। एवं सति अर्थज्ञाने न हि पदार्थानां हानिरपितु तेषामान्तरिकत्वम् स्वीकार्यम्।

डा० द्विवेदिमहाभागाः कथयन्ति यन्मूककवीनां काव्ये न हि शब्दस्य स्थितिरिति तस्य काव्यरूपाद्बहिर्भावः।

अत्रोच्यते—

श्रोत्रस्य विषयः शब्दो ज्ञानाकारं प्रपद्यते।
मूकान्नास्य बहिर्भावस्तत्र तस्य स्थितिर्मता॥१५॥

शब्दः श्रोत्रस्य विषय इति श्रोत्रेण गृहीतस्यास्य आन्तरिकत्वेन स्थितिः। एषा च स्थितिर्मूकेऽपि सम्भवतीति न हि मूककविकृते काव्ये शब्दस्याभावः।

डा० द्विवेदिमहाभागाः पुनः कथयन्ति यदनुवादेन शब्दपरिवर्तनेऽपि काव्यस्यापरिवर्तितया स्थितिरिति न हि काव्यस्वरूपे शब्दस्यान्तर्भावः। अत्रोच्यते—

अनुवादे खलु काव्यस्योत्कृष्टताऽपचीयते।
परिवृत्तिर्यथा शब्दे ह्यर्थेऽपि सा तथा मता॥१६॥

अनुवादे न हि काव्यस्य सर्वथैवापरिवर्तनमपितु तत्सदृशत्वम्। यथा मेघदूतानुवादस्य न हि कालिदासकृतमेघत्वेन ग्रहणमपितु तद्गतेनानुवादेन। किञ्च काव्ये शब्दस्यार्थवैशिष्ट्यम्। अनुवादे वैशिष्ट्येऽस्मिन् जायते कापि हानि। अत एव तस्य न हि मूलवन्महत्त्वमिति तात्त्विकी स्थिति। अपरञ्च काव्ये सगीतात्मकताया वर्णध्वनेश्च य प्रभावस्तद्गता हानिस्त्वनुवादे सुस्पष्टा। अत एव गीतगोविन्दसदृशाना काव्याना न हि अनुवादसम्भावना।

द्वितीय उद्योत

रससमीक्षणम्

सौक्ष्म्यं सत्यगतं काव्ये पूर्वं यत्प्रतिपादितम् ।
उपाया बहवस्तस्य सकीर्त्यन्ते समासत ॥१७॥
प्राधानं सूक्ष्मधर्माणाम् सादृश्यञ्च समर्थनम् ।
आधानञ्च निमित्तस्य विरोधश्चाविरोधत ॥१८॥
व्यापारस्य विशेषो हि व्यञ्जनासंज्ञया मत ।
भावानामपि योगश्चेत्युपाया अत्र सम्मता ॥१९॥
काव्ये सत्यानुभूतिर्या सा न हेया कदाचन ।
इयमात्मा हि काव्यस्य रसोऽपीयं समीहिता ॥२०॥

सत्यस्य विवेचनानन्तर सम्प्रति सत्यगताया सूक्ष्मताया विवेचन प्रस्तूयते। अस्मिन् प्रसगे एतत्सूक्ष्मताधानस्य काव्यगता य उपायास्तेऽत्र विचारणीया । अत्र प्रथम उपायो विद्यते लोकगतस्य सत्यस्य सूक्ष्मधर्माणामुपादानम् । समर्थतहेतूपादानादिभि-रप्यस्या सत्यगताया सूक्ष्मताया प्रकाशनमित्येतेऽन्ये उपाया । काव्ये सूक्ष्मधर्मा शब्द-गम्या इति तेऽर्थरूपा । शब्देनार्थप्रतीति शब्दव्यापाराश्रिता इत्यस्य व्यापारस्य सूक्ष्म-ताया कश्चनातिशय इत्येषोऽपर उपाय । काव्ये सूक्ष्मधर्माणा प्रतीतिरनुभूतिश्च भावयोगेन चात्र तीव्रतेत्येष भावयोगोऽन्य उपाय । सत्यस्य सूक्ष्मधर्माणामुपादान स्वभावोक्त्यलकार समर्थनादीनामुपादानेऽर्थान्तरन्यासादयो व्यापारस्य सूक्ष्मतायाञ्च व्यञ्जनाव्यापार इति मदीये ग्रन्थे काव्यसत्यालोके प्रतिपादितमिति नेह वितन्यते। सत्यगताया सूक्ष्मताया भावयोगे रसादीना स्थितिरिति तदत्र सविशेष प्रतिपादनीयम्। ध्वनिवादिना मतानुसार रसस्यालक्ष्यक्रमव्यङ्ग्यध्वनिरिति व्यपदेश इति तत्र व्यञ्जना-व्यापारस्य चारुता । अस्मन्मतानुसार सतोऽपि व्यञ्जनाव्यापारस्यालक्ष्यत्वेनाप्रतीति ।

सत्यप्येव रसस्य व्यङ्ग्यान्तरेभ्यो यो विशेष स्वीकृतस्तत्र विभावादिप्रतिपादनम् आन्तरिकस्य च भावस्य तत्र योग एव हेतु । विभावादीनामस्मन्मतानुसार सत्यगतसूक्ष्मतायामन्तर्भाव इति भावयोगपूर्वकमेवास्या सत्यगतसूक्ष्मताया विवेचन युक्तियुक्तम् । सत्यगतसूक्ष्मताया भावयोगेन सत्यानुभूतिरिति रसानुभूति सत्यानुभूते प्रकारविशेष इति स्थितम् । किञ्च रससूत्रस्य रसोदाहरणानाञ्च विवेचनेनाप्येतत्साधयितु शक्य यद् रसानुभूते सत्यानुभूतावन्तर्भाव । प्रथम रससूत्रविवेचन प्रस्तूयते । अत्र लोल्लटसम्मत विवेचनमेवमस्ति —

"विभावैर्ललनोद्यानादिभिरालम्बनोद्दीपनकारणै रत्यादिको भावो जनित, अनुभावै कटाक्षभुजाक्षेपप्रभृतिभि कार्यै प्रतीतियोग्य कृत, व्यभिचारिभिर्निर्वेदादिभि सहकारिभिरुपचितो मुख्यया वृत्त्या रामादावनुकार्ये तद्रूपतानुसन्धानान्नर्तकेऽपि प्रतीयमानो रस ।"

—काव्यप्रकाश

अत्रानुकार्यगता नटगता वा रसप्रतीतिर्लोल्लटसम्मतेति प्रायेण विदुषा मतम् । पर न हि एतद्युक्तियुक्त प्रतिभाति । अत्र 'प्रतीयमान' इति पदस्य रत्यादिक इत्यनेन पदेन सह सम्बन्ध । अतो मुख्यया वृत्त्या रामादावनुकार्ये तद्रूपतानुसन्धानान्नर्तकेऽपि प्रतीयमानो रत्यादिको भावो रत्यादिकस्य भावस्य प्रतीतिर्वा रस । प्रतीतिरेषा सहृदयगतेति रत्यादिकस्यानुकार्यगतत्वेन नर्तकगतत्वेन वा सहृदयगता प्रतीति रस इति लोल्लटसम्मतम् । परं रत्यादिकस्य परगतत्वेन प्रतीतिर्न हि चारुत्वावहेत्यस्य भावस्य न हि व्यक्तिविशेषगतत्वेन प्रतीति स्वीकार्या । किञ्च रामादिसम्बन्धिनि वर्ण्यविषयेऽत्र सत्यता सूक्ष्मता च स्वीकरणीया । सत्यगता सूक्ष्मता प्रति अस्माक रागसामान्यमित्यत्र चमत्कारोत्पत्ति । एषैवास्मत्सम्मता सत्यानुभूति ।

श्रीशङ्कुकसम्मत रससूत्रविवेचनमेवमस्ति —

"नटेनैव प्रकाशितै कार्यकारणसहकारिभि कृत्रिमैरपि तथाऽनभिमन्यमानैर्विभावादिशब्दव्यपदेश्यै 'संयोगात्' गम्यगमकभावरूपादनुमीयमानोऽपि वस्तुसौन्दर्यबलाद्रसनीयत्वेनान्यानुमीयमानविलक्षण स्थायित्वेन सम्भाव्यमानो रत्यादिर्भावस्तत्रासन्नपि सामाजिकाना वासनया चर्व्यमाणो रस ।

—काव्यप्रकाश

अनेन नटप्रकाशितै कृत्रिमैरपि विभावादिभिर्नटेऽसतोऽपि रत्यादिकस्य भावस्य सामाजिकेन यदनुमान स रस इति श्रीशङ्कुकस्य मतम् ।

अत्रोच्यते—लोके पर्वतगतस्याग्नेर्येन धूमेनानुमानं तस्य यथार्थतैव न तु कृत्रिमता। अत्र च विभावादीनां कृत्रिमतेत्यस्यानुमानस्यायुक्तता।

ननु शङ्कुककृतमनुमानं स्वप्रभावं दर्शयत्येवेति तस्य हेतोः कृत्रिमता अकृत्रिमता वेत्यविचारणीयमिति चेदुच्यते—एवंविधस्यानुमानस्य कालान्तरे बाधः सम्प्रति च भ्रान्तिरूपता स्यात्, न चैतत् श्रीशङ्कुकस्यापि सम्मतम्।

किञ्च न हि अनुमीयमानयाऽपि रत्या चमत्कारानुभूतिः। अत्र चाय हेतुर्यदनुमानं बौद्धिकव्यापारविशेष इति तत्र चमत्काराभावः।

ननु वस्तुसौन्दर्यबलाद्रसनीयत्वेनास्मिन्ननुमाने चमत्कार इति चेत्पृच्छ्यते कुत एतदनुमेयगतं सौन्दर्यम्? अनुमेया तावदत्र नटगता रतिः। सा च परगता सामाजिकस्य कृते इति न हि तत्र सौन्दर्यस्य प्रतीतिः। अतेन सौन्दर्यमेतद्वर्ण्यविषयस्य स्वगतसूक्ष्मतामाश्रयत इति स्वीकार्यम्। एवंच अस्मत्सम्मता सत्यानुभूतिः।

भट्टनायकसम्मतं रससूत्रविवेचनमेवमस्ति —

"अभिधातो द्वितीयेन विभावादिसाधारणीकरणात्मना भावकत्वव्यापारेण भाव्यमानः स्थायी सत्त्वोद्रेकप्रकाशानन्दमयसंविद्विश्रान्तिसतत्त्वेन भोगेन भुज्यते।"

—काव्यप्रकाश

अतो भावकत्वव्यापारेण विभावादीनां साधारण्येन स्थायिनोऽपि साधारणीकरणम्। साधारणीकृतस्य चास्य भोजकत्वव्यापारेण भोग इति भट्टनायकस्य मतम्।

अत्र विभावादीनां यत्साधारणीकरणं स्वीकृतं तदस्माकमपि सम्मतम्। परमस्य साधारणीकरणस्य को हेतुरित्यपि विचारणीयम्। अस्य चैतदेवोत्तरं यदसत्यगता सूक्ष्मताऽत्र हेतुः। अनया सूक्ष्मतया सत्यानुभूतिरत्र दुर्वारा। भट्टनायकमतानुसारं भाव्यमानस्य स्थायिभावस्य महत्त्वमिति तदायत्ता रसानुभूतिस्तस्य सम्मता। अत्र यो भोगव्यापारः स तु चित्तगतोऽवस्थाविशेषः। अस्य च सत्यानुभूतिगताया अवस्थाया न हि कोऽपि विशेषः।

श्रीमदाचार्याभिनवगुप्तसम्मतं रससूत्रविवेचनमेवमस्ति "... तैरेव कारणत्वादिपरिहारेण विभावादिव्यापारवत्त्वादलौकिकविभावादिशब्दव्यवहार्यैः ... साधारण्येन प्रतीतैरभिव्यक्तः सामाजिकानां वासनात्मतया स्थितो रत्यादिकः ... रसः।"

—काव्यप्रकाश

अत्राभिनवगुप्तसम्मतं साधारणीकरणमस्माकमपि सम्मतम् । अस्य साधारणीकरणस्य को हेतुरिति विचार्यमाणे विभावादिगतं सत्यं सौक्ष्म्यञ्चात्र हेतुरिति तत्प्रयोज्या सत्यानुभूतिरत्र दुर्वारा । अभिनवगुप्तमतानुसारं वासनात्मतया स्थितं सम्प्रति चाभिव्यक्तो रत्यादिक एव रसः । रत्यादिकस्य वासनात्मतया स्थितिस्तस्याभिव्यक्तिश्चास्माकमपि सम्मता परं महत्त्वमनैतद्रत्यादिकपरामृष्टाया विभावादिगतायाः सत्यताप्रतीतेरित्यत्र सत्यानुभूतिः । अभिव्यक्तस्य रत्यादिकस्य कथं रसरूपतेत्यत्र विचारणीयम् । रतिर्भिन्ना रसश्च भिन्नः । अतो न हि प्रथमस्यान्यरूपता । रतेरभिव्यक्तावपि न हि रतित्वस्य हानिः । किञ्चात्र साधारणीकरणेऽपि रतित्वमव्याहतमिति न हि एकस्यान्यरूपता । यदि च रत्यादिकस्याभिव्यक्तौ रतित्वादिकस्य हानिः स्यात्तर्हि शृङ्गारादिषु रसेषु भेदस्य किं विनिगमकं स्यादिति रतित्वादिकस्य स्थितिरत्रापरिहार्या । किञ्च क्रोधादयो रजोगुणप्रधानाः रसश्च सत्त्वगुणप्रधान इति कथमेषां रसरूपता । ननु रत्यादिकस्याभिव्यक्तौ रतित्वादिकस्य सत्त्वेऽपि तत्त्वान्तरस्य योग इति रसानुभूतिसम्भावनेति चेदुच्यते किमिदं तत्त्वान्तरम् । आन्तरिकं बाह्यं वा । यदि बाह्यं तर्हि विभावादिकमेवैतद् भवितुमर्हति । यदि चान्तरिकं तर्हि आन्तरिकस्यापि तत्त्वस्य न हि बाह्यतत्त्वाभावे स्फूर्तिरिति किमपि बाह्यतत्त्वमस्य प्रयोजकत्वेन स्वीकार्यम् । एतद्विभावादिकमेव भवितुमर्हति । अत्राप्यनुभूतिप्रयोजकत्वाय कश्चन विशेषः स्वीकार्यः । एष च विशेषो विभावादिगता सत्यता सूक्ष्मता च । अस्य विशेषस्यैतज्जन्ये आन्तरिकतत्त्वेऽपि परिस्फुरणमिति सत्यानुभूतिरत्रानायत्या आयाता ।

केषाञ्चन विदुषां शान्तभक्त्यादयो रसत्वेन सम्मताः । श्रीमदाचार्याभिनवगुप्तानां शान्तो रसत्वेन सम्मतः । एषु रसेषु शमादीनामभिव्यक्तानां रसरूपता भवितुमर्हति । अत्र चायं हेतुर्यच्छमादयोऽलौकिकाः रसाऽपि चालौकिका इत्येषां रसरूपताग्रहणे न हि किमप्यनौचित्यम् । परमेते रसाः अध्यात्मशास्त्रगताः इति काव्यशास्त्रे एषां विवेचनमयुक्तम् । अनेन शान्तादिगता सरणिर्नावलम्बनीया ।

सम्प्रति रसोदाहरणविवेचनं प्रस्तूयते—

> ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः,
> पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम् ।
> दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा,
> ... स्तोकमुर्व्यां प्रयाति ॥

रसवादिनामनुसारमेतद्भयानकरसस्योदाहरणमित्यत्र रसानुभूति । अस्मन्मतानुसारमेतन्मृगविशेषस्य सत्य सूक्ष्मञ्च वर्णनमित्यत्र सत्यानुभूति ।

अलंकारवादिनामनुसारमत्र स्वभावोक्त्यलंकार । अस्य चास्मन्मतानुसार सत्यानुभूतावन्तर्भाव ।

> वाच न मिश्रयति यद्यपि मद्वचोभि,
> कर्णं ददात्यभिमुख मयि भाषमाणे ।
> काम न तिष्ठति मदाननसमुखीना,
> भूयिष्ठमन्यविषया न तु दृष्टिरस्या ॥

आलंकारिकमतानुसारमेतच्छृङ्गाररसस्योदाहरणमित्यत्र रसानुभूति । अस्मन्मतानुसारमत्र कामविकारग्रस्ताया शकुन्तलाया दुष्यन्तकृत यथार्थ वर्णन तत्र च रागयोग इत्यत्रेदविधा सत्यानुभूति ।

रसानुभूति सत्यानुभूते प्रकारविशेष, सत्यगतसूक्ष्मताया भावयोगेन चास्य निष्पत्तिरिति स्थिते भावयोगोऽत्र विचारणीय । भावयोगस्य परिज्ञानाय भावानामपि परिज्ञानमावश्यकमिति तेऽत्र विचारणीयत्वेन प्रस्तुता । ननु भावानामपि सत्येऽन्तर्भाव सत्यस्य च रूपाणि पूर्वत एव निरूपितानीति भावाना तद्व्यतिरिक्तत्वेन निरूपणमयुक्तमिति चेदुच्यते—भावयोगेन सत्यगतसूक्ष्मताया कश्चन विशेष इति भावविवेचन युक्तियुक्तमेव ।

भावविवेचनम् —

चेतनापरिणामा ये ते भावा इति मे मतिः ।
उद्भवे हेतुतामेषाम् विषया यान्त्यनेकदा ॥२१॥

भावाश्चेतनापरिणामविशेषाश्चित्तवृत्तिविशेषा वा । ननु चितिशक्तिरपरिणामिनीति कथ तस्या परिणाम इति चेदुच्यते चित्तप्रतिबिम्बितामेव चितिशक्तिमभिप्रेत्यात्र परिणामशब्दस्य प्रयोग, चितिशक्त्यावस्था चित्तपरिणामानामेतद्गतत्वेनैव प्रतीते । व्युत्पत्त्यनुसार भावस्यार्थो द्विधा—भवन्तीति भावा भावयन्तीति वा भावा । वस्तुतो न हि केवल भावा एव भवन्ति अपितु तद्भिन्ना अन्येऽपि पदार्था इति न हि भावशब्दस्य प्रथमोऽर्थो युक्तियुक्त । भावा स्वसवलितान् सर्वानर्थान् भावयन्ति वासयन्तीत्यनया दृष्ट्या भावशब्दस्य द्वितीयोऽर्थो युक्तियुक्त । परमय भावस्य केवल वार्थाभिधायी

न तु स्वरूपाभिधायी । एवं स्थिते चित्तवृत्तिरूप इत्येव भावशब्दस्य युक्तियुक्तोऽर्थः । परं घटाकाराकारिता वृत्तिः पटाकाराकारिता वृत्तिरिति बुद्धेर्यस्य रूपस्यापि परिणामस्य चित्तवृत्तावन्तर्भावो न च स भावाभिध इति चित्तवृत्तिविशेषस्यैव भावार्थकत्वं स्वीकार्यम् । अस्मिन्नर्थे चित्तपरिणामस्य न हि विषयैकान्वितत्वेन स्थितिरपितु तदंशभूतत्वेनापि । गमनादिक्रियावेगदर्शनेन चित्ते यो वेगसञ्चारस्तत्र चित्तपरिणामस्य केवलं विषयोपरक्ततया न तु स्वतन्त्रतया स्थितिरिति न हि तस्य भावेऽन्तर्भावः ।

भावानामुद्भवे विषययोगो यथाकथञ्चित्स्वीकार्य एव । परं यत्र कुत्रचिन्न हि अस्य योगस्यानिवार्यत्वम् प्राधान्यं वा विषयाभावेऽपि भावविशेषस्य स्थितिदर्शनात् । अत्र चित्तगतैरुपादानैर्भावविशेषस्य निर्माणम् । चित्तगतान्युपादानानि सन्ति सत्त्वरजस्तमांसि । अत्रापि भावदृष्ट्या रजोगुणस्य विशिष्टता । एवं स्थिते रजोगुणेन यस्य भावस्य साक्षान्निर्माणं तत्र चित्तोपादानस्य प्राधान्यं तस्य च भावस्य सर्वेषु भावेषु वैशिष्ट्यमिति ज्ञेयम् । अयमेव भाव उत्साह इत्युत्साहस्य भावान्तरेभ्यः कश्चन विशेषः स्वीकार्यः ।

भावेषु प्रधानभूतेनोत्साहेन सह आन्तरिकतत्त्वानां बाह्यतत्त्वानाञ्च योगः । आन्तरिकतत्त्वेषु प्राणतत्त्वस्य सत्तेति प्राणप्रेरितस्योत्साहस्य सर्वातिशायित्वम् । अस्य प्राणप्रेरितस्योत्साहस्यार्थं प्रति प्रवृत्तिरित्यार्थिकं जगदस्य बाह्यं कार्यक्षेत्रम् तत्र चास्य वर्गसंघर्षरूपेणाभिव्यक्तिः । बाह्यतत्त्वेषु धर्मस्य देशस्य च स्थितिरिति धर्मप्रेरितस्य देशप्रेरितस्य चोत्साहस्य लोके दर्शनम् ।

एतदतिरिक्तं विद्वद्भिर्दयादानशास्त्रादिसम्बन्धिनामप्युत्साहानां निरूपणं कृतम् । अत्र दया वृत्तिविशेषस्तस्याश्च धर्मेऽन्तर्भाव इति दयाप्रेरितस्योत्साहस्य धर्मप्रेरितोत्साहेऽन्तर्भावः । अत्रायं विशेषो यदेवंविधस्योत्साहस्य प्रायेणाध्यवसायरूपेणाभिव्यक्तिर्न तु संघर्षरूपेण । यद्यपि प्राणप्रेरितस्याप्युत्साहस्य श्रमरूपेणाध्यवसायरूपेण वाऽभिव्यक्तिसम्भावना परं तस्य पर्यवसानं संघर्षरूपेणैव । दानसम्बन्धिनोऽप्युत्साहस्य धर्मप्रेरित एवोत्साहेऽन्तर्भावः । परं दयाप्रेरितादुत्साहादस्यायं विशेषो यद्दया वृत्तिविशेषः, तया च प्रेरितस्य दयावत उत्साहे प्रवृत्तिः । अत्र पुनर्दानमेव प्रवृत्ते रूपमित्यत्रोत्साहस्य दानकर्मणाऽभिव्यक्तिः ।

शास्त्रसम्बन्धिन्यप्युत्साहे ज्ञानात्मके शास्त्रेऽन्तर्भूतेन सिद्धान्तविशेषेण प्रेरितस्य जनस्योत्साहदर्शनम्, सिद्धान्तविशेषप्रचाराय तस्य जनस्य कृते धर्मरूप इत्यस्योत्साहस्य धर्मोत्साहेऽन्तर्भावः । इयांस्तावदत्र विशेषो यत्सिद्धान्तो मूलतो विचाररूपः परं सम्बन्धदार्ढ्यतास्य वृत्तिरूपतावाप्तिः, दयादीनां पुनर्मूलत एव वृत्तिरूपता ।

सम्प्रति विषयसम्बन्धेनाधिगतस्वरूपाणां भावानां विवेचनं प्रस्तूयते । एते भावा विषयाल्लक्ष्यीकृत्येति येन रूपेण विषयाणां प्रतीतिस्तदनुसारमेव चेतनायाः परिणामः । तद्यथा-विषयविशेषे आकर्षणप्रतीतिरिति चेतनायास्तं प्रति आकृष्टता रागवृत्तिर्वा ।

विषया द्विविधा एते चेतनापरिवर्तिनः ।
आकर्षका मताः केऽपि ह्यन्ये सन्ति विकर्षकाः ॥२२॥

चेतनां प्रति विषयाणां प्रतीतिर्द्विविधा–आकर्षकत्वेन विकर्षकत्वेन वा । अनेनाकर्षणं विकर्षणञ्चेति द्वौ प्राधान्येन विषयधर्मौ । विषयधर्मावप्येतौ तदैव सम्भाव्येते यदा तदनुसारं चेतनावर्तिनौ रागद्वेषरूपौ धर्मौ स्याताम् ।

इत्थं विषयसम्बन्धदृष्ट्या चेतनायाः प्राधान्येन द्वौ प्रकारौ रागो द्वेषश्च । एते एव सम्बन्धदृष्ट्या मूलभूते प्रवृत्ती इत्यस्माकं मतम् ।

आकर्षणसम्बन्धिनो भावाः —रागे चेतनायाः यस्मिन् विषये आकर्षणं तं प्रति तस्या उन्मुखतेति विषयोऽयमस्या उन्मुखताया अवलम्ब इति ज्ञेयम् । एवं सति विषयस्य विनाशेऽवलम्बस्याप्यस्य विनाश इति स्पष्टम् । एवंव चेतनायाः शोके परिणतिः । कुत्रचिच्च स्वविषये विकृतिदर्शनेन तदुन्मुखत्वतीव्रताया ह्रास इति चेतनायास्तत्रैव प्रसारः । इयमेव हासस्य स्थितिः ।

विकर्षणसम्बन्धिनो भावाः —विषयविकर्षणजन्यानि चेतनागतानि प्रमुखाणि रूपाणि विषयपराङ्मुखता, विषयं प्रति प्रतिरोधो विषयाक्रान्तता च । विषयपराङ्मुखता जुगुप्सायाम् । विषयं प्रति प्रतिरोधे चेतनायाः क्षोभ इति तस्याः क्रोधरूपतावाप्तिः । विषयाक्रान्ततायां विषयगतप्रबलशक्त्या प्रतिरोधस्य समाप्तिरिति चेतनाया भयरूपतावाप्तिः ।

विस्मयस्थितिः —कुत्रचिद् विषयगतेनासाधारण्येन रागादिक्रियास्वसमर्था चेतना किंकर्तव्यमूढतामापद्यते । एवंवास्या विस्मयस्थितिः ।

अनेन प्रकारेण विषयसम्बन्धजन्यचेतनापरिणामरूपेण रागहासशोकजुगुप्सा-क्रोधभयविस्मयानां विवेचनं कृतम् । भावेषु प्रमुखतामापन्नस्योत्साहभावस्य विवेचनं पूर्वमेव सवृत्तम् । चित्तोपादानजन्यस्यास्योत्साहस्य यद्यपि विषयाभावे एव लब्धसत्ताकत्वम्, परं लब्धसत्ताकस्यास्य विषयेणापि योगः । अत्र विषयस्य स्थितिर्द्विधा–आकर्षकत्वेन

विकर्षकत्वेन च। यत्र विषयस्याकर्षकत्वेन स्थितिस्तत्र विषयान्वितस्योत्साहस्य प्रभ-र्षेणाभिव्यक्ति, यत्र च विषयस्य विकर्षकत्वेन स्थितिस्तत्रोत्साहस्य मर्षरूपेणाभि-व्यक्ति ।

एषु भावेषु रागस्य रतेर्वा विविधा प्रकारा । तत्र कान्ताविषया रतिस्तु प्रसिद्धैव। रते पुनर्येऽन्ये प्रकारास्तेषा परिज्ञानाय रते स्वरूपसामान्यस्य प्रवृत्तिविषयस्य च ज्ञानमपेक्षितमिति तदत्र प्रस्तूयते। स्वरूपसामान्येन रतिरात्मीयतापरपर्याया आत्मी-याश्च जनान् प्रति अस्या प्रवृत्तिरिति ज्ञेयम्। ननु तत्त्वदृशा सर्वत्रात्मन प्रसार इति सर्वत्र आत्मीयतासद्भावेन रतिप्रवृत्तिप्रसग इति चेदुच्यते—सम्भवन्त्यप्येषा प्रवृत्ति-रात्मन्यावरणारोपेण बाधितेति सर्वत्रास्या अप्रसर । एव गतेऽस्यावरणस्य यदि व्यक्ति-वर्गविशेषेण स्वभाववैशिष्ट्याद् विच्छेद स्यात्तदा रतेस्तत्र प्रवृत्तिसम्भावना। एष वर्ग-विशेष शिशुवर्गो बालकवर्गो वा। स्वनिश्छलत्वेन निष्कपटत्वेन चास्य प्रसिद्धिरित्या-वरणाभावेनात्र रतिप्रवृत्ति । अस्मिन् बालकवर्गेऽबोधनया चेतना अविकसितावस्थावर्तिनी अस्मदीया पुनर्वि कसितावस्थावर्तिनीत्यस्मच्चेतनाया अत्र या प्रवृत्ति सा स्नेहरूपा वत्सलतारूपा वेति ज्ञेयम्।

ननु आध्यात्मिकेऽपि पुरुषे निश्छलताया स्थितिरिति तत्रापि स्नेहप्रवृत्ति स्यादिति चेदुच्यते—निश्छलतायामस्या चेतनाया विकास, अस्मासु पुनश्चेतनाया विकासा-भाव इति तत्र रतिप्रवृत्तेर्न हि स्नेहेऽन्तर्भाव ।

सख्यभाव —तुल्यविकासा चेतना प्रति आत्मीयतावशाच्चेतनाया प्रवृत्तौ सख्यभावस्याविर्भाव । लोकेऽस्य भावस्य प्रायेण सर्वगतत्वेन स्थिति । पर काव्यगतेऽस्मिन् नोऽपि विशेष इत्यौदात्त्यतत्त्वेऽस्यान्तर्भाव ।

श्रद्धाभाव —आत्मीयतावशादधिकविकासा चेतना प्रति चेतनाया प्रवृत्तौ श्रद्धाभावस्याविर्भाव । श्रद्धाभावोऽयं पित्रादीन् प्रति। तद्यथा—पित्रादीनामस्मान् प्रति आत्मीयताभावना तदनुरूपश्च व्यवहार इत्यस्माकमपि तान् प्रति आत्मीयताभावना। एते पुनश्चेतनाविकासशालिन इति तान् प्रति प्रवृत्ताया अस्या भावनाया श्रद्धायामन्त-र्भाव । श्रद्धैका उदात्तभावनेति अस्या औदात्त्यतत्त्वेऽन्तर्भाव ।

देवादिविषया रति —अस्या रतौ विषया देवादय । एते चालौकिका इत्येतेषा विषयत्व चेतनारोहापेक्षम्। किञ्चास्य रतेर्न हि सर्वविषयत्वमपितु भक्तैर्विषयत्व-मित्यस्या औदात्त्यभावे एवान्तर्भाव सुस्पष्ट ।

एते प्रकारान्तराणि —क्रीडाविशेषविषया देशविशेषविषया सिद्धान्तविशेष-विषयाश्चेत्यादयोऽनेके रतिप्रकारा सम्भवन्ति । अत्र क्रीडाविशेषविषया रतिरश्वरत्यादि-रूपा, देशविशेषविषया राष्ट्रभक्त्यादिरूपा सिद्धान्तविशेषविषया च साम्यवादादिसिद्धान्त-गतरतिरूपा ।

अत्र क्रीडाविशेषविषयाया रतेर्न हि रागसामान्यात्कश्चन विशेष, भावत्वा-पादनाय च रागगतस्य विशेषस्यापेक्षेत्यस्या रतेर्भावत्वाभाव । ननु क्रीडाविशेषयोगेन रागेऽपि विशेषयोग इति चेन्न एवंविधेन विशेषेण चेतनात्मके रागे विशेषस्याप्रतीते । किञ्चैवंविधरतेर्भावत्वप्राप्तौ धावनरतिर्भ्रमणरतिरित्यादीनामखिलानामेव व्यापाररति-प्रकाराणां भावत्वप्रसंग ।

राष्ट्रभक्तौ मातृभूमिगतप्रदेशादिकं तद्गतां संस्कृतिञ्च लक्ष्यीकृत्य श्रद्धाभाव-नेत्यस्या औदात्त्यतत्त्वेऽन्तर्भाव । वस्तुतस्तु एवंविधभक्त्यभावेऽपि देशादिकस्य काव्यगत-वर्णनसम्भावनेति न हि भक्तियोगस्यैवंविधवर्णने सर्वत्रापेक्षा । सत्यामपि च यथाकथ-ञ्चिदस्या भक्तौ यत्रोत्साहस्यैव प्राधान्येन वर्णनं तत्रोत्साहभाव एव स्वीकार्य ।

सिद्धान्तविशेषविषयाया रतौ रतिदार्ढ्येन विचाररूपस्य सिद्धान्तस्यैव वृत्ति-प्रायत्वापादनमित्येतद्विषयाया रतेर्धर्मभावनायामन्तर्भाव । परं काव्ये सिद्धान्तविशेषस्य प्रतिपादनं न हि एवंविधभावनाप्रदर्शनपुरस्सरमपितु सिद्धान्तसन्निवेशमात्रपुरस्सरम् । किञ्च सन्निवेशोऽप्ययं केवलं लोकमत्यानुरूप्यत्वेन न तु स्वतन्त्रतयेत्यवधेयम् ।

उपरिनिर्दिष्टेषु भावेषु औदात्त्यतत्त्वान्वितान् भावान् विहायान्ये भावा स्थायिभावा । अत्र च कारणमेतदेव यद्रागमनात्मतया स्थितेषु स्थायिभावेषु चेतना-सामान्यस्तरवर्तिनी औदात्त्यतत्त्वे तु तस्या आरोहापेक्षेति औदात्त्यतत्त्वान्वितानां भावना-मुत्साहादिस्थायिभावेभ्यो बहिर्भाव । स्थायिभावत्वेन न हि अत्रैतदभिप्रेतं यत् स्थायि-विशेषस्य सर्वत्रैव स्थायित्वमपितु एतदेवाभिप्रेतं यत्तस्य स्थायित्वयोग्यता । अनेन प्रकरणबलात्तस्य स्थायित्वेऽपि प्रकरणान्तरे सहकारित्वमपि सम्भाव्यते । अस्य स्थायिभाव-स्यान्ये भावा सहकारिण । एत एव व्यभिचारिण इत्यालङ्कारिकाणां मतम् ।

भावाश्चित्तवृत्तिविशेषा इति प्राक् प्रतिपादितम् । अनेन सहकारिभावा अपि चित्तवृत्तिविशेषा इत्यायातम् । किञ्चैते सहकारिभावा स्थायिभावानां सहकारिण इत्येते स्थायिसम्बन्धिनीनामेव चित्तवृत्तीनामवस्थाविशेषा इत्यायातम् ।

स्थायिभावा प्रायेण विषयाकर्षणविकर्षणजन्या इति सहकारिभावानामप्यनेकत्रैषा स्थिति । तद्यथा–विषयाकर्षणावस्थायामभीष्टवस्तुप्राप्तौ विलम्बासहिष्णुतया औत्सुक्यम्, अभीष्टवस्तुनोऽनर्थचिन्तने शङ्का, अभीष्टस्याप्राप्तौ ध्यानैकतायां चिन्ता, विरहादिवशेन मनस्तापे व्याधिः, अभीष्टस्य प्राप्तौ च हर्ष । विषयविकर्षणावस्थायां परगुणासहिष्णुतायामसूया, चित्तसङ्कोचे व्रीडा, द्वेषादिवशेन चित्तस्यास्थिरतायां चपलता, अनर्थाधिक्येन मन सम्भ्रमे आवेग, अपमानादिना कोपस्य स्थिरतायाममर्ष, अधिक्षेपादिना चित्तस्य प्रचण्डतायामुग्रता मन क्षोभे च त्रास ।

यत्र नाकर्षण न च विकर्षण तत्रौदासीन्यभाव ।

एषु भावेषु चित्तोपादानभूताना सत्त्वरजस्तमोगुणाना विविधा परिणामा । एषु गुणेषु भावदृष्ट्या रजोगुणस्य प्राधान्यम् । अनेन न हि केवलमस्य गुणस्य विकासे अपितु ह्रासेऽपि भावाविर्भाव । तद्यथा-मनस्तापेन निष्प्राणता ग्लानि, ग्लानेर्हेतुभूत श्रम, श्रमादिसम्भूता मनसो निरुद्योगिता आलस्यम्, दुर्गतिजन्या मनस ओजस्विताह्रास दैन्यम् चिन्तादिवशेन कार्ये पाटवाभावो जडता, श्रमादिवशेनेन्द्रियाणा व्यापारशून्यता निद्रा, निद्रावस्थाया विषयानुभूति सुप्तम्, सत्त्वसङ्क्षये विषाद, मूर्च्छा च मरणम् ।

सत्त्व प्रकाशक तत्त्वमिति तस्य स्फुटत्वेन प्रतीतौ निम्नाङ्किताना भावानामाविर्भाव —सदृशानुभवादिजन्य पूर्वानुभूतवस्तुज्ञान स्मरणम्, निद्रासमाप्तौ चैतन्यलाभ प्रबोध, शास्त्रादिपरिचयवशेनार्थनिश्चयो मति, सन्देहे विचारविमर्शश्च वितर्क ।

सत्त्वगुणस्य हानौ निम्नाङ्किताना भावानामाविर्भाव चित्तस्य विचित्तता मोह, मनोव्यथाजन्य स्मृतिप्रमोषोऽपस्मार, चित्तविभ्रमश्चोन्माद ।

भावेष्वहङ्कारतत्त्वस्य यथाकथञ्चित्सर्वत्र स्थिति । पर यत्रास्य सामान्यत शैथिल्यतो वा स्थितिस्तत्र न हि अस्य प्रतीति । प्रधानताया पुनरस्य स्फुटा प्रतीतिरिति तत्प्रयोज्याना भावाना दर्शनम् । तद्यथा—स्वप्रभावाधिक्येन अवज्ञाया गर्व, अत्रैव सम्मोहमिश्रणे च मद ।

आलङ्कारिकैरवहित्थानामकोऽपि भाव स्वीकृत । लज्जादिवशेन प्रसन्नतागोपनमिति च तस्य लक्षण कृतम् । वस्तुतो भावस्याभ्यावृतित्वेऽन्तर्भाव । एतच्च व्यापक तत्त्वम् । समाजेऽस्यानेकत्र दर्शनम् । अस्यैव व्यापकस्य तत्त्वस्यांशविशेषो भावरूप । एवविधस्य चास्य विचाररूपेऽन्तर्भाव । व्यञ्जनाव्यापारेऽप्यस्य तत्त्वस्य यत्र कुत्रचित्स्थिति । तद्यथा—

मातर्गृहोपकरणमद्य नास्तीति साधितं त्वया ।
तद्भण किं करणीयमेवमेव न वासरः स्थायी ॥

अत्र स्वैरविहारार्थिनीत्यर्थो व्यङ्ग्यः । वाच्यार्थस्याशविशेषश्चात्रावरणम् । परञ्चमत्कारोऽत्र न हि आवृतिरूपोऽपितु अर्थप्रकाशनरूप इति व्यञ्जनाया आवृतितत्त्वाद्भेदः । किञ्च 'गतोऽस्तमर्कः' इत्यादिषु व्यञ्जनोदाहरणेषु न हि आवृतितत्त्वमिति व्यञ्जनायाः स्वतन्त्रतायाः स्थितिः ।

अवस्थादिकभेदेनैतेषामनेकरूपता ।
भावानामपि तस्मात्स्याद् भेदसंख्यातिभूयसी ॥ २३ ॥

भावगतमेतद्विवेचनमलंकारशास्त्रे स्थिरपदानामेव भावानां यथासम्भवं प्रतिपादनार्थम् । वस्तुतस्तु चित्तवृत्तिविशेषा न हि परिसंख्यातुं शक्या इति भावा अपरिसंख्येयाः ।

किञ्चैतेषु निरूपितेष्वपि भावेषु व्यक्तिदेशकालादिभेदेन भेद इत्येषा भावानां वैविध्यम् । तद्यथा-लज्जा कश्चन सामान्यभावः, परं स्त्रीपुरुषभेदेनात्रापि भेदः । पुरुषादिगताया लज्जायामवस्थाभेदेन पुनरपि भेदः । अत्रापि देशकालादिकं पुनर्भेदहेतुः । तद्यथा-भारतीयनारीगताया लज्जायाः पाश्चात्यनारीगताया लज्जायाः कश्चन विशेषः । अत्र च देशविशेषगता मान्यता एव कारणम् । अनेन बुद्धिगतानां मान्यतानामनेकशो भावस्वरूपेऽन्तर्भाव इत्यपि स्थितम् ।

भावा द्विविधा —वर्गगता व्यक्तिगताश्च

एषु भावेषु केचन वर्गगता प्रतीति तेषा व्यक्तिगतेभ्यो भावेभ्य कश्चन विशेष । ननु व्यक्तिगतानामपि भावाना प्रतिव्यक्ति स्थितिरिति वर्गव्यक्तिकृतो भेदोऽकिञ्चित्कर इति चेदुच्यते वर्गगताना भावाना बाह्याभिव्यक्तौ समाजस्याप्यन्तर्भाव , न हि व्यक्तिगतेषु भावेषु एवविधा स्थितिरित्येव भेदो युक्तियुक्त एव ।

वर्गगतेषु भावेषु उत्साहोऽन्यतम । अत्रापि प्राणप्रेरितस्योत्साहस्य प्राधान्यम् । उत्साहोऽयमर्थोन्मुख इति प्रथम श्रमरूपेण ततश्चार्थिकसघर्षरूपेणास्याभिव्यक्ति । अस्योत्साहस्य श्रमिकवर्गे सविशेषा स्थिति । धनिकवर्गगतोऽप्युत्साहोऽर्थोन्मुख । परमुत्साहोऽय न हि प्राणप्रेरणाजन्योऽपितु अर्थलिप्साजन्य इत्यस्योत्साहस्य कश्चनापकर्ष । किञ्चार्थं लक्ष्यीकृत्य धनिकेषु परस्परमपि सघर्ष इत्यस्योत्साहस्य पुनरपि हानि । वर्गगतस्य सघर्षरूपेणाभिव्यक्तस्योत्साहस्यास्य विकर्षणातिशये रोषत्वावाप्ति क्रान्तिरूपेण च पर्यवसानम् ।

वर्गगतस्योत्साहस्य देशप्रेरितोत्साहो धर्मप्रेरितोत्साह इत्यादयोऽन्येऽपि प्रकारा । देशस्य धर्मस्य चानेके भेदा । तेषा तत्त्वतो देशे धर्मे वा अन्तर्भाव इति तत्सम्बन्धिनामुत्साहप्रकाराणा न हि पृथक्परिगणनौचित्यम् ।

देशादिप्रेरित उत्साहे यदाकदाचन वर्गविशेषस्योत्साहो न हि वस्तुतो देशादिप्रेरितोऽपितु अर्थप्रेरित , देशादिक तु तत्रावरणमात्रम् । यथा उत्साहेऽस्मिन् धनिकवर्गस्योत्साह तत्त्वत प्रायेणार्थप्रेरितो देशादिक तु तत्रावरणमात्रम् । अनेनैव चावरणेन तत्र श्रमिकवर्गगतस्योत्साहस्य साहाय्ययोग ।

आवृतिभावोऽपि वर्गगत । अस्य भावस्य प्राधान्येन स्थितिर्धनिकवर्गे इति प्राक् प्रतिपादितम् । धनिकेतरेषु आवृतितत्त्वस्य या स्थिति सा धनिकाचरणप्रेरितेति ज्ञेयम् ।

नैराश्यभावोऽपि वर्गगत । अस्य स्थिति प्राधान्येन शोषितवर्गे । शोषकवर्गेऽप्यस्य यथाकथञ्चन स्थिति पर ममत्वप्रतीत्यभावेन तत्र वर्गभावनाया अभाव । वर्गशब्दस्य तत्र य प्रयोग स तु धनिकेषु शोषकत्वाविशेषात् ।

नैराश्यभावोऽयमुत्साहस्य विपरीता स्थितिरिति उत्साहे मन्दता प्रयातेऽस्याविर्भाव । नैराश्यमेतदुद्देश्यदृष्ट्येति स्वशोषणदृष्ट्या शोकस्यैव प्रतीति । शोकस्यात्र त्रिधाऽवस्था:-प्राविर्भावोचिर्मरणञ्च ।

सत्ये भावयोग —

विधानं भावयोगस्य सत्यरूपे समीहितम् ।
सत्यस्य यानि रूपाणि तत्रार्थस्य विशेषता ॥२६॥
चित्रणेऽस्यार्थसत्यस्य पुरुषा द्विविधा मता ।
केचनार्थविहीनाः स्युरपरे च धनान्विताः ॥२७॥
सत्ये सूक्ष्मतया जाता ह्यत्र साधारणीकृतिः ।
सामान्यमनयाऽऽयातम् विशेषोऽप्यत्र कश्चन ॥२८॥

भावविवेचनानन्तरं सम्प्रति भावयोगः प्रस्तूयते । सत्ये यो भावयोगस्तत्र न हि सत्यात् पृथक् स्थितस्य भावस्य सत्ये योगोऽपितु भावयुक्तस्यैव सत्यस्य स्थितिरिति ज्ञेयम् ।

प्राकृतिकसत्ये भावयोग —यस्मिन् बाह्यपरिवेशे भावस्याभिव्यक्तिः स बाह्यपरिवेशोऽपि भावस्यागमः । अस्मिन् परिवेशे तत्त्वद्वयम् सामान्यं विशेषश्च । यत्र सामान्यस्य प्राधान्यम् तत्र सार्वदेशिकताया स्थितिर्यत्र च विशेषस्य प्राधान्यम् तत्र प्रादेशिकतायाः स्थितिः ।

प्राकृतिकसत्ये भावयोगः प्रकृतौ चेतनारोपेणापि सम्भाव्यते । चेतनारोपे प्रकृतिचित्रणं द्विधा—स्वतन्त्रतया जीवनसहकारितया वा । पूर्वत्र भावयोगः स्पष्ट एव परत्रापि जीवनगतानां भावानां प्रकृतावपि प्रभाव इति तत्र भावयोगः । काव्येष्वस्य योगस्यानेकत्र दर्शनमिति नेह वितन्यते ।

आर्थिकसत्ये भावयोग — अत्र आर्थिकसत्यस्य सूक्ष्मं चित्रणम् । आर्थिकसत्ये श्रमिकवर्गस्य धनाढ्यवर्गस्य चान्तर्भाव इत्यनयोरत्र सूक्ष्मं चित्रणम् । अनेन सूक्ष्मेण चित्रणेन पात्रादीनां साधारणीकरणम् । तद्यथा—श्रमिकविशेषस्य धनाढ्यविशेषस्य च पात्रत्वेऽनयोर्विशेषांशपरिहारेण सामान्यांशस्य ग्रहणमिति श्रमिकसामान्यस्य धनाढ्यसामान्यस्य चात्र प्रतीतिः । अनेन च सहृदयस्य सत्यानुभूतिः ।

भट्टनायकमतानुसारं साधारणीकरणं भावकत्वव्यापारजन्यम् । परमस्मन्मतानुसारमेतन्न हि व्यापारविशेषजन्यमपितु सत्यगतसूक्ष्मचित्रणजन्यम् । अस्यैव सूक्ष्मचित्रणस्य चित्तगतो यः प्रभावस्तदनुसारमस्य यदि व्यापार इति व्यपदेशस्तर्हि न हि कापि हानिः ।

अभिनवगुप्तपादाचार्याणां साधारणीकरणसम्बन्धि विवेचनमेवमस्ति —

'ममैवैते शत्रोरेवैते तटस्थस्यैवैते, न ममैवैते न शत्रोरेवैते, न तटस्थस्यैवैते इति सम्बन्धविशेषस्वीकारपरिहारनियमानध्यवसायात् साधारण्येन प्रतीतैः"

—काव्य प्रकाश

अत्रेदमवधेयं यत्सम्बन्धविशेषस्वीकार इव तत्परिहारोऽप्यत्रानभिप्रेत इति साधारणीकरणे न हि केवलं सम्बन्धविशेषस्वीकारस्यापितु तत्परिहारस्यापि लोपः । किञ्च सर्वविधसम्बन्धपरिहारे पदार्थस्यानुपस्थितिरित्येतत्परिहारस्य लोपः स्वीकार्यः ।

अत्र रामचन्द्रशुक्लाचार्या एवमाशङ्कन्ते—काव्यगता विषया विशेषा एव न तु सामान्या इति तत्र न हि पुरुषसामान्यस्य चित्रणमपितु विशिष्टतायुक्तस्य पुरुषविशेषस्य ।

अत्रोच्यते—न हि साधारणीकरणे विशिष्टतायोगे च नियतो विरोध इति तत्रापि साधारणीकरणे पदार्थस्य विशिष्टतायोगदर्शनम् । तद्यथा येषां विशेषाणां परिहारेण साधारणीकरणं तेषामभावः अन्येषां तु स्थितिः । ननु साधारणीकरणे सर्वविधविशेषाणां परिहार इति चेन्न मोहननामकस्य श्रमिकस्य मोहनत्वश्रमिकत्वपुरुषत्वप्राणित्वादिविशेषाणां क्रमिकपरिहारेण सत्तामात्रत्वावशेषप्रसङ्गात् । किञ्च साधारणीकरणेन न हि मोहनस्य पुरुषसामान्यत्वमपितु पुरुषविशेषत्वमपि । पुरुषविशेषत्वञ्चेदं न हि मोहनस्य पर्यायोऽपितु श्रमिकात्मकं तस्य साधारणीकृतं रूपम् ।

ननु मोहनस्य केषां केषां धर्माणां परिहारः केषां केषाञ्च स्थितिरिति चेत् प्रकृतसत्यानुगतानां तेषां स्थितिरन्येषाञ्च परिहार इति ज्ञेयम् ।

साधारणीकरणस्य सिद्धौ साधारणीकरणमेतत्कस्येति विचारणीयम् । अस्मन्मतानुसारमेतत्प्रस्तुतस्य सत्यस्येति ज्ञेयम् । आलङ्कारिकमतानुसारमेतद् विभावादिकस्येत्येषां स्थितिः । विभावादिकस्य वस्तुतोऽस्मिन्नेव सत्येऽन्तर्भाव इत्यत्र न हि तात्त्विकमन्तरम् ।

विभावः पुनर्द्विविधः—आलम्बनरूप उद्दीपनरूपश्च । आलम्बनमत्र यं व्यक्तिविशेषं प्रति स आश्रय इति तस्यापि साधारणीकरणम् । किञ्चानुभावा आश्रयगताश्चेष्टाविशेषाः । एतेषाञ्च साधारणीकरणं सर्वसम्मतमित्येतेषामधिष्ठानभूतस्याश्रयस्यापि साधारणीकरणमनायत्याऽऽयातम् । अत्र यस्याश्रयस्य आलम्बनस्य च साधारणीकरणमभिप्रेतं तत्र न हि आश्रयत्वमालम्बनत्वञ्च नियतमपितु परस्परपरिवर्तनशीलमपि । तद्यथा-स्वस्वरूपेण श्रमिकपरिवारस्य श्रमिकसमक्षमादावुपस्थितिरिति श्रमिके शोकस्योद्बोधः ।

उद्बोधोऽत्र परिवारस्वरूपजन्य इति परिवारोऽत्रालम्बनम् श्रमिकश्चाश्रय । अथ स्वस्व-रूपेण श्रमिकस्य परिवारसमक्षमुपस्थितिरिति परिवारे शोकस्योद्बोध । अत्र श्रमिक आलम्बन परिवारश्चाश्रय इति यस्मिन् श्रमिके पूर्वमाश्रयत्वधर्मस्तस्मिन्नेव सम्प्रति आलम्बनत्वधर्मं, यस्मिंश्च परिवारे पूर्वमालम्बनत्वधर्मस्तस्मिन्नेव सम्प्रति आश्रयत्वधर्मं इति स्पष्टम् ।

सहृदयगतस्य भावस्य साधारणीकरणम्—प्रस्तुतस्य सत्यस्य साधारणीकरणे सिद्धे सहृदयगतस्य भावस्य साधारणीकरणं न वेति विचारणीयम् । अत्रोच्यते—साधारणीभूतस्य सत्यस्य सहृदयोऽनुभवितृत्वेन तदनुभवितृगतस्य भावस्य साधारणीकरणमनायत्याऽऽया-तम् ।

ननु सत्यमर्थसम्बन्धि । श्रमिकस्य धनिकस्य चात्रान्तर्भाव । श्रमिकोऽत्र शोषितो धनिकश्च शोषक इति धनिकेन सहृदयेन न हि एवंविधस्य प्रस्तुतस्य सत्यत्वेन ग्रहसम्भा-वना । तदभावे चास्य सहृदयस्य साधारणीकरणं दूरापेतम् ।

अत्रोच्यते-सत्यमत्र जीवनसम्बन्धि न तु निर्धनमात्रसम्बन्धीति धनिकैरपि तस्य सत्यत्वेन ग्रह । परं धनिकविशेषण यदि तस्य तथात्वेन ग्रहो न स्यात्तर्हि तस्य मानसमेव तत्रान्तराय इति ज्ञेयम् । भौतिकपदार्थेष्वप्येतद्घटते । तद्यथा-मधुरताम्लतादयो भौतिक-गुणा, रसनेन्द्रियेण चैषां ग्रहणम् । परं सत्यस्य कस्मिंश्चिद् विकारे सतोऽपि माधुर्यादिकस्य ग्रहणाभाव ।

सत्यनिरूपणप्रसङ्गे सिद्धान्तनिरूपणस्याधिक्ये सति तद्गताया सत्यताया विप्रति-पत्तिसम्भावना । अत्र चाय हेतुर्यत् सहृदयस्य स्वीया मान्यतेति तस्या वर्ण्यविषयगत-मान्यताया वैपरीत्ये न हि वर्ण्यविषयस्य सत्यत्वेन ग्रह । विषयस्य यत्र सत्यत्वेन ग्रहणमत्रापि सिद्धान्तगत सूक्ष्मत्व काव्यस्वरूपप्रतिकूलतापर्यवसायीति तत् परित्याज्यम् । अनेन न हि एतदभिप्रेतं यत्सत्यता काव्याद् बहिर्भाव स्यादपितु केवलमेतदेव यत्सा जीवनगतसत्य-चित्रणस्य सहजपरिणामा स्यान्न तु पृथक्प्रयत्ननिर्वर्त्या ।

आश्रयेण सह सहृदयस्य तादात्म्यम्—कैश्चिद्विद्वद्भि सहृदयस्य साधारणी-करणस्थाने आश्रयेण सह तस्य तादात्म्यमभेदो वा स्वीकृत । विश्वनाथस्यैतदेव मतम् । रसगङ्गाधरकारेणापि नवरसनिरूपणप्रसङ्गे भावनादोषवशेनैवाविधोऽभेद उन्नमित । यथा—

"व्यापारोऽस्ति विभावादेर्नाम्ना साधारणीकृतः ।
तत्प्रभावेण यस्यासन् पाथोधिप्लवनादयः ।
प्रमाता तदभेदेन स्वात्मानं प्रतिपद्यते ॥

—साहित्यदर्पण

"यदपि विभावादीनां साधारण्यं प्राचीनैरुक्तम्, तदपि दोषविशेषकल्पनं विना दुरुपपादम् । अतोऽवश्यकल्प्ये दोषविशेषे तेनैव स्वात्मनि दुष्यन्ताद्यभेदबुद्धिरपि सूपपादा ।"

—रसगंगाधर

अत्रोच्यते—न हि सिद्धान्तोऽयं युक्तियुक्तः । तद्यथा—आधिकमत्यचित्रणे भ्रमिकादयः पात्राणीति एष्वेवान्यतमोऽत्राश्रयः । साधारणीकरणाभावे अनेन सह सहृदयस्य तादात्म्यमात्रेण न हि काव्यगतांशः सत्यानुभूतेर्लौकिकानुभवात्कश्चन भेदः स्यात् ।

अपरञ्च 'ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः' इत्यत्राश्रयो मृगः । स च पशुविशेष इति तेन सह तादात्म्ये सहृदयस्य पशुत्वापत्तिः स्यात् ।

ननु तादात्म्यबाधकानां सहृदयाश्रयगतानां विशेषाणां परिहारे सहृदयाश्रययो-स्तादात्म्यसम्भावनेति चेदुच्यते विशेषाणां परिहार एव साधारणीकरणमिति तेनैव सत्यानुभूतौ पुनस्तत्कृते तादात्म्यस्यानपेक्षितत्वम् ।

समुद्रलङ्घनादीनामलौकिककर्मणां वर्णने तादात्म्यमपरिहार्यमिति यदुक्तं तदपि न युक्तियुक्तम् । यतो लौकिककर्मस्वपि तादात्म्यमेतदयुक्तमिति अलौकिकेष्वेतदयुक्ततरम् । किञ्चालौकिककर्म लोकगतात्सत्याद् बाह्यमिति तस्य वर्णनं न हि सहृदयानुरञ्जकमिति ज्ञेयम् ।

पण्डितराजजगन्नाथोद्धृते भावनादोषाश्रिते अभेदसिद्धान्तेऽभ्रमपरोऽपि दोषो यदत्रानुभूतिर्दोषजन्येति एतद्दोषपरिहारेणास्या परिहारादस्या भ्रान्तिरूपतापत्तिः स्यात् ।

सहृदयगतानां कविगतानां चानुभूतीनां तादात्म्यम् —

सहृदयगतानां कविगतानां चानुभूतीनां तादात्म्यमेव साधारणीकरणमिति डा० नगेन्द्रादयः । अत्रोच्यते—भट्टनायकसम्मतस्याभिनवगुप्तसम्मतस्य च साधारणी-करणस्य अस्मात्तादात्म्याद्भेद इत्येतदयुक्तम् ।

किञ्च कविगतासु सहृदयगतासु चानुभूतिषु साम्यमात्र न तु तादात्म्यम्। तद्यथा-आदौ तावत्कवे समक्ष सत्यगतस्य सूक्ष्मरूपस्योपस्थिति । अस्य च कविगताया. प्रतिभाया दृष्टिपक्षेण ग्रह इत्येतदीया अनुभूतिर्दृष्टिपक्षक्रियासवलिता। अथ कविगताया प्रतिभाया सृष्टिपक्षस्य व्यापारो दृष्टिपक्षविषयभूतस्य च रूपस्याभिव्यक्तिरित्येतदीया अनुभूति. सृष्टिपक्षक्रियासवलिता। अथ सत्यगतस्यास्य सूक्ष्मरूपस्य सहृदयगताया भावयित्र्या. प्रतिभाया समक्षमुपस्थितिरित्येतदीया सहृदयगता अनुभूतिर्भावयित्रीप्रतिभासवलिता। अनेन कविगतासु सहृदयगतासु चानुभूतिषु भेद इति स्पष्टम्। सत्यप्यस्मिन् भेदे उभयत्र सत्यगता सूक्ष्मतेति साम्यम्। भट्टतौतस्याप्येदमेवाभिप्रेतम्—

"नायकस्य कवे श्रोतु समानोऽनुभवस्तत ।"

साधारणीकरणप्रयोजकानि तत्त्वानि —साधारणीकरणप्रयोजकरूपेण सत्यगता सूक्ष्मता पूर्वं निरूपिता। अत्र तत्त्वद्वयम्—सत्य तद्गता सूक्ष्मता च। यत्रास्मिन् सत्ये भावयोगस्तत्र भावानामस्मिन्नेव सत्येऽन्तर्भाव । सत्यमत्र प्राथिक सत्यम्। एतच्च न हि व्यक्तिविशेषेण सम्बद्धमपितु समाजेन सम्बद्धमिति सामाजिकमात्रस्यात्र सत्यताप्रतीति । सत्यगताया सूक्ष्मताया अपि प्रतीति सामाजिकस्य जायते। परमेष न हि सामाजिक-सामान्योऽपितु सामाजिकविशेष । स च विशेष सूक्ष्मताद्युन्मुखीभवनयोग्यता तदभावे विद्यमानाऽपि सूक्ष्मता अविद्यमानैवेति सत्यगतसूक्ष्मताप्रतीतिर्न हि विषयविषयिसयोगमात्र-जन्येति सिद्धम्। भौतिकगुणप्रतीतेरपि सदा कदाचनैतादृशी गव स्थिति.। तद्यथा-मधुराम्लादिरसप्रतीतिरेका भौतिकी प्रतीति । सा च न हि माधुर्यादिसद्भावमात्राधीना अपितु रसयितु रसनावर्तिरसग्रहणशक्त्ययोनेति रसयितृविशेषस्य रसनायामेतच्छक्त्यभावे रसान्तरणसम्पर्केण वा तत्र विकारे न हि तस्य रसास्वादसामर्थ्यम्।

सत्यगतसूक्ष्मताद्युन्मुखीभवनयोग्यताया भौतिकरसग्रहणशक्तौ च विद्यते कश्चन भेद । स चायम्-भौतिकरसग्रहणशक्ति रसनावर्तिनीति स भौतिको धर्म । सत्यगत-सूक्ष्मताद्युन्मुखीभवनयोग्यता पुनश्चेतनावर्तिनीति स चेतनाधर्म । किञ्च रसग्रहणशक्ति रसनाया नियतो धर्म, सत्यगतसूक्ष्मताद्युन्मुखीभवनयोग्यता च चेतनाया अनियतो धर्म । एषा योग्यतैव सहृदयत्वमेतद्योग्यतावन्तश्च सहृदया इत्यस्माक मतम्।

श्रमिकस्य श्रमे निष्ठेति तत्रातीवानुकूलता।
सत्यस्यागे धनाढ्येऽपि सा कथञ्चन वर्तते।।२६।।

प्रायिकसत्यचित्रणे पात्राणि प्रति सहृदयस्य द्विधा प्रवृत्ति —अनुकूला प्रतिकूला च। येषु पात्रेष्वाकर्षण तेष्वनुकूला प्रवृत्तिर्येषु च विकर्षण तत्र प्रतिकूला प्रवृत्ति ।

श्रमिकेऽस्माकमाकर्षणमित्यत्रानुकूला प्रवृत्तिर्धनिकेषु च विकर्षणमित्यत्र प्रतिकूला प्रवृत्ति । एतच्चेत्थम्-नैतिकनियमानुसारं यत्र श्रमरूपा क्रिया तत्रैव तस्य परिणामस्य स्थिति । यथा वृक्षे प्ररोहरूपा क्रियेति तत्रैव फलस्य स्थिति । परं लोकगते आर्थिकसत्ये श्रमस्य स्थिति श्रमिके तज्जन्यस्यातिरिक्तार्थस्य च स्थितिर्धनाढ्ये इति स्वश्रमफलाद्-वञ्चिते श्रमिकेऽस्माकमाकर्षणम् श्रमापेक्षया अधिकार्थप्राप्तिकारित्वि च धनिके विकर्षणम् । सत्यप्यस्मिन् विकर्षणे धनिकस्याधिकार्थप्राप्तिर्लोकगतस्यार्थिकसत्यस्यांग-मित्यनया दृष्ट्या तत्र विकर्षणाभाव ।

ननु काव्ये पात्रादीनां साधारणीकरणम् । साधारणीकरणे च सम्बन्धविशेषस्य स्वीकारपरिहाराभाव इति कथमनानुकूलतादिकस्य प्रतीति । अत्रोच्यते–साधारणी-कृतेष्वपि पात्रेषु अनुकूलतादिकस्य यथाकथञ्चित्स्थितिरिति रामायणे रामं प्रति अस्माकमनुकूलताप्रतीति, रावणं प्रति च तदभाव ।

श्रमिकान् प्रति अस्माकमनुकूला प्रवृत्तिरिति तेष्वन्यतमस्य नायकत्वसम्भावना, धनिकान् प्रति एवंविधाया प्रवृत्तेरभावो न्यूनता चेति तेष्वन्यतमस्य प्रतिनायकत्व-सम्भावना ।

आर्थिकसत्यचित्रणे श्रमिकस्य नायकस्यानेके सहाया । एषु श्रमिकाणां निर्धनानां कृषकाणां शोषितानाञ्च बुद्धिजीविनामन्तर्भावः । धनिकस्य प्रतिनायकस्या-प्यनेके सहाया । एषु प्रतिक्रियावादिनेतॄणामन्तर्भाव ।

तृतीय उद्योत

रसवैशिष्ट्यादिसमीक्षणम्

रसे कश्चिद्विशेषो न सत्त्वादस्तीति मे मतिः ।
अस्मिन्नुक्तो विशेषो यः सत्त्वेऽपि तस्य संस्थितिः ॥३०॥
कथं रसः स्फुटे भेदे ब्रह्मानन्दसहोदरः ।
वासना याऽत्र जागर्ति ब्रह्मणि सा विलीयते ॥३१॥

सत्त्वगतसूक्ष्मतया भावयोगेन साधारणीकरणबलाद् या अनुभूतिः सा अस्मन्मतानुसारं सत्त्वानुभूतेरेव प्रकारविशेषः । आलंकारिकमतानुसारमेषा रसानुभूति-र्भावानुभूतिर्वेति ज्ञेयम् । यत्र सत्त्वगतसूक्ष्मतया स्थायिभावस्य योगस्तत्र रसानुभूतिर्यत्र च तस्या भावान्तरस्य योगस्तत्र भावानुभूतिः । आलंकारिकैः रसानुभूतेर्वैशिष्ट्यसाधनाय केषा-ञ्चन विशेषाणामत्रोपादानम् । अस्मन्मतानुसारं न हि एभिरस्या रसानुभूतेः सत्त्वानुभूतेः कोऽपि विशेषः । तथथा-रसो ब्रह्मानन्दसहोदर इति रसवादिना मतम् । ब्रह्मानन्दश्चात्मानु-भूतिवर्तीति आत्मानुभूत्या सह रसस्य सादृश्यमायातम् । अत्रोच्यते-अस्य सादृश्यस्य क आधार इति प्रथमं विचारणीयम् । द्वयोः पदार्थयोर्मुख्यतः सादृश्यप्रतीतिस्तदैव सम्भाव्यते यदा सादृश्यप्रतीतेऽनयोः साक्षात्कारः स्यात् । परमात्मानुभूते रसानुभूतेश्चेति द्वयोरेकेन जनेन साक्षात्कार एव न सम्भवति । तच्चेत्थम्--रसानुभूतिर्वासनाजन्या आत्मानुभूतौ च वासनानामभाव इति वासनावता जनेन आत्मानुभूतिर्वासनारहितेन च जनेन रसानुभूतिर्न सम्भाव्यते । ननु आत्मानुभूतावीश्वररतिरित्यत्रापि वासनासद्भाव इति चेदुच्यते-एषा वासना लौकिकवासनाभ्यो भिन्नेत्यस्याः सद्भावे तासामुच्छेदस्तासाञ्च सत्त्वेऽस्या आविर्भावाभावः । किञ्चैषाऽऽत्मानुभूतिर्भक्तिमार्गसम्मता । ज्ञानमार्गेऽस्या अपि वासनाया अभावः । अथ रसवादिन एतद्वक्तुं प्रभवन्ति यत्कृतात्मसाक्षात्कारेण जनेन पूर्वानु-भूतस्य रसस्य स्मरणं भवतीति तेन सह आत्मानुभूतेः सादृश्यसम्भावना । अत्रोच्यते-वासनानामुच्छेदे कुतस्तदाश्रितायाः रसानुभूतेः स्मरणस्याप्यवकाशः ।

एवं सति रसवादिभिरेतदेव वाच्यं यदात्मानुभूतेः प्रागपि आत्माभिमुखस्य साधकस्य आत्माभिमुखत्वजन्या भवति काप्यनुभूतिः । अस्यामनुभूतौ न हि वासनानामुच्छेद इत्यनया सह रसानुभूतेः सादृश्यसम्भावना । कालान्तरवर्तिनी आत्मानुभूतिरस्या एवानुभूतेश्चरमा परिणतिरित्यनयापि सह रसानुभूतेः सादृश्यमिति ज्ञेयम् । अस्मन्मतानुसारमेवंविधं सादृश्यं गौणमेव न तु मुख्यम् ।

द्वयोरनुभूत्योः सादृश्यस्थापनाय रसवादिनां प्रायेणायं तर्को यत्कृतात्मसाक्षात्कारेण जनेन आत्मानुभूतेर्यद्वर्णनं तेन सह रसानुभूतेस्तुलनेत्यत्र सादृश्यप्रतीतिः । अत्रोच्यते-'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इति वचनानुसारमात्मानुभूतिर्वाग्विषयातीता इत्येतद्वर्णनं न हि आत्मानुभूतेरपितु कस्या अप्यवरावस्थायाः, तत्रापि च न हि मूलतत्त्वस्यापितु तत्सहकारितत्त्वानां वाचा उपस्थितिः । अनेनानयोरनुभूत्योर्यत्सादृश्यं तद्गौणमेव ।

किञ्च ब्रह्म सत्यं जगन्मिथ्येत्यद्वैतवेदान्तसिद्धान्तानुसारं ब्रह्मेतरा प्रतीतिर्मिथ्या । रसस्याप्यस्यामेव प्रतीतावन्तर्भाव इति तस्या मिथ्यात्वम् । मिथ्याप्रतीतेश्च न हि सत्यस्वरूपया आत्मानुभूत्या सह सादृश्यसम्भावना । अत एव पण्डितराजजगन्नाथेन 'रत्याद्यवच्छिन्ना भग्नावरणा चिदेव रसः' इत्यभिदधता रसे चितो भग्नावरणत्वेन सह रत्याद्यवच्छिन्नत्वमपि स्वीकृतम् । अवच्छिन्नत्वमेतदावरणापरपर्यायम् । किञ्च भग्नावरणत्वेनापि न हि नियतत्वेनैतदभिप्रेतं यदखिलानामावरणानामत्र भङ्ग इति जातेऽपि कस्मिंश्चिदावरणभङ्गेऽन्येषामावरणानामभग्नतया स्थितिसम्भावना ।

साङ्ख्यसिद्धान्तानुसारं यद्यपि पुरुषव्यतिरिक्तस्य चित्तस्यापि सत्त्वं तथापि चित्तगतस्यानुभवस्य पुरुषगतानुभवरूपतया ग्रहणमज्ञानाश्रितम् । रसानुभूतिश्च चित्तगतेति तत्त्वदृष्ट्या अज्ञान एवान्तर्भावान्न हि अस्या आत्मानुभूत्या सह सादृश्यम् ।

शैवदर्शनानुसारमखिलस्य विश्वस्य परमशिवाभासरूपता । रसानुभूतौ च विभावादिविमर्शप्राधान्यमित्यात्मानुभूत्या रसस्य भेदः स्पष्ट एव ।

ननु रसे विभावादीनां साधारण्येन प्रमातुर्व्यष्टित्वपरिहार इति तस्य विगलितपरिमितप्रमातृभावत्वम् । आत्मानुभूतावपि प्रमातुर्विगलितपरिमितप्रमातृभावतेति रसानुभूतेरात्मानुभूत्या सह सादृश्यसम्भावनेति चेदुच्यते-साधारणीकरणप्रयोज्यस्यास्य विगलितपरिमितप्रमातृभावस्य तत्त्वदृशा परिमितत्वे एवान्तर्भावः ।

अत एवास्माभिः साधारणीकरणे सामान्येन सह विशेषस्यापि स्वीकारः । किञ्चास्य विशेषस्य स्वीकाराभावेऽपि सामान्यस्यानेकानि स्तराणि स्वीकरणीयानि ।

रसे न हि एषा स्तराणां चरमावस्थेति अत्रत्यस्य सामान्यस्योत्तरवर्तिसामान्यापेक्षया विशेषरूपतेत्यात्मानुभूत्या सह न हि रसानुभूतेः सादृश्यसम्भावना । एवं सति डा० के० कृष्णमूर्तेर्निम्नलिखितं कथनं न हि युक्तियुक्तम्—

"[1]In aesthetic experience we have an approximation with the highest transcenddental rapture in so far as the empirical self rises above its normal limitation of primordial ignorance"

अभ्यासवैराग्याभ्यां तन्निरोधः[2] इति वचनानुसारमात्मानुभूतिप्राप्तये मुमुक्षोर्योऽभ्यासः स वैराग्योन्मुखः, रसानुभूतिप्राप्तये सहृदयस्य योऽभ्यासः स काव्यानुशीलनरूपः[3] । काव्ये च लोकगतस्य सत्यस्य सूक्ष्मं चित्रणमित्यस्मिन्नेव सन्ये सहृदयस्य पुनः पुनः प्रवृत्तिरूपोऽभ्यासः ।

अभ्यासवैराग्याभ्यां या आत्मानुभूतिः सा निरवधिः, रसानुभूतिश्च विभावादिजीवितावधिरित्यत्र कालभेदः । कालभेदश्चायं चेतनारोहभेदजन्य इति स उभयोरनुभूत्योः स्वरूपभेदपर्यवसायीति स्थितम् । अनेन रसानुभूतेर्न हि आत्मानुभूत्या सह सादृश्यमिति स्पष्टम् । यदि चैतत् सादृश्यप्रदर्शनं रसानुभूतेर्लौकिकानुभवाद् वैलक्षण्यमात्रपर्यवसायि नहि सत्यानुभूतावपि तद्वैलक्षण्यमिति न हि रसानुभूतेः सत्यानुभूतेः कोऽपि विशेषः । अन्यद् यत्किमपि विरुद्धधर्मताप्रदर्शनपुरस्सरं रसस्य लोकोत्तरत्वमभिनवेन प्रस्तुतं तस्य सत्यानुभूतावपि सङ्गतिरिति रसस्यात्रैवान्तर्भावः ।

1 श्रीविद्याधरशास्त्रिस्मृतिग्रन्थ.

2. योगदर्शनम्

3 अभिनवभारती

रसस्यसुखात्मत्वा दिविवेचनम्

सरणिः सा सुखोपेता स्थायी तत्र प्रतीयते ।
तस्यातो दुःखरूपत्वे स्पर्शो दु.खस्य दुस्त्यज ॥३२॥

सम्प्रति सत्यानुभूतिरूपायां रसानुभूतौ सुखदु खादिदृष्ट्या कस्य योग इत्येतन्नि-रूपणीयम् । अस्मान्निरूपणात्प्राक् किं सुख किञ्च दु खमित्यपि विचारणीयम् येन सत्यानुभूतावस्य योगस्य निर्णये सौकर्यं स्यात् । अनुकूलवेदनीय सुख प्रतिकूलवेदनीयञ्च दु खमित्यत्र न हि कापि विप्रतिपत्ति । अनेन यत्रानुकूलताया प्रतीति स्यात्तत्र सुख यत्र च प्रतिकूलताया प्रतीतिः स्यात्तत्र दु खमित्यायातम् । अनुकूलता च सा यत्र पुरुषस्य प्रवृत्ति, प्रतिकूलता च सा यत्र पुरुषस्याप्रवृत्ति । सत्यानुभूत्याञ्च सहृदयाना प्रवृत्तिरित्यत्र सुखस्य योग इति तु स्पष्टम् । पर सत्यपि दु खस्पर्शे सुखातिशययोगेन विषयविशेष प्रति पुरुषाणा प्रवृत्तिदर्शनमित्यत्र दु खस्यापि स्पर्शो विद्यते न वेत्येष विचार सम्प्रत्यप्यवशिष्यते । अत्रोच्यते—सत्यानुभूतौ सत्यान्तर्भूतस्य वस्तुन पात्रादिकस्य चाप्युप-स्थितिरिति वस्तुविचार पात्रादिविचारोऽप्यत्रानया दृष्ट्या अपेक्षित । अत्र वस्तुविचार प्रस्तूयते । वस्तु द्विविधम्—आकर्षणतत्त्वयुक्त विकर्षणतत्त्वयुक्तञ्च । यत्र वस्तुनि रागादि-योगस्तत्र तदाकर्षणतत्त्वयुक्तम् । यत्र च तस्मिन् जुगुप्साशोकादियोगस्तत्र तद् विकर्षण-तत्त्वयुक्तम् । आकर्षणतत्त्वयुक्ते वस्तुन्यनुकूलतेति तत्र सुखप्रतीति । विकर्षणतत्त्वयुक्ते च वस्तुनि प्रतिकूलतेति तत्र दु खप्रतीति । अनेन सत्यान्तर्भूते वस्तुनि विकर्षणतत्त्वयोगे सत्यानुभूतौ सुखप्रतीत्या सह दु खस्यापि स्पर्श इति स्पष्टम् । ननु विकर्षणतत्त्वयोगे वस्तुनि प्रतिकूलताप्रतीतिरिति सहृदयाना तत्राप्रवृत्तिरिति कृततदन्तर्भावाया सत्यानुभूतौ कथ सुखप्रतीतिसम्भावनेति चेदुच्यते-वस्तुन्यत्र सत्यताया अपि प्रतीति । सा चानुकूलेत्यत्र सुखप्रतीति । किञ्चात्र सत्यताया सूक्ष्मतेति एतज्जन्याया सत्यानुभूतौ सुखप्रतीते-रतिशय । अनेनातिशयेनैकत सुखप्रतीतौ वृद्धिरपरतश्च विकर्षणतत्त्वजन्यस्य दु ख-स्पर्शस्य न्यूनतेति सुधीभि स्वयमाकलनीयम् ।

पात्रादिविचारे एतदवधेयं यत्पात्राणां न हि स्वतन्त्रतया स्थितिरपितु वस्तुनोऽङ्गत्वेनेत्येषां विचारे एषैव सरणिरनुसर्तव्या । श्रमिके आकर्णनमित्यत्रानुकूलताप्रतीतिः । अनेनास्य प्रतिकूले वर्णने प्रतिकूलतायाः स्पष्टतः प्रतीतिरिति श्रमिकगतस्य शोकस्य वर्णने दुःखस्पर्शः स्पष्ट एव । सत्यप्येव तत्र सत्यतायास्तद्गतसूक्ष्मतायाश्चातिशय इति सुखानुभूतेः प्राधान्यमिति स्पष्टम् ।

प्राचीनैरालङ्कारिकैरपि सुखदुःखादियोगदृष्ट्या रसस्य विवेचनं कृतम् । अत्र रसाः पूर्णसुखात्मका इति प्रायेण तेषां मतम् । विश्वनाथजगन्नाथादीनामस्यामेव कोटावन्तर्भावः । सिद्धान्तोऽयं सामान्यतो युक्तियुक्तः । परं पूर्वप्रतिपादितन्यायेन शोकादियोगे काव्यानुभूतौ कश्चन दुःखस्पर्शोऽनुभवगोचर इति सोऽपि स्वीकार्यः ।

ननु अभिनवगुप्तमतानुसारं रसे संवेदनमेवानन्दघनमास्वाद्यते । तत्र का दुःखाशङ्का ।

अत्रोच्यते-रसे स्वसंवेदनेन सह रत्यादीनामपि प्रतीतिः । सा चाभिनवस्यापि सम्मता । यथा—

तस्यैव चित्रताकरणे रतिशोकादिवासनाव्यापारः ।

अ० भा० पृ० २९२

किञ्च पण्डितराजजगन्नाथस्यापि रसानुभूतौ भग्नावरणायाश्चितोऽवच्छेदकत्वेन रत्यादिप्रतीतिः सम्मता । तद्यथा—

'रत्याद्यवच्छिन्ना भग्नावरणा चिदेव रसः ।'—रसगङ्गाधर

ननु रसे चितोऽवच्छेदका एते शोकादयः साधारणीकृताः । साधारणीकृतानाञ्चालौकिकत्वमिति न हि तेषां दुःखजनकत्वसम्भावना ।

अत्रोच्यते-शोको दुःखस्वरूप इत्यत्र सत्यपि साधारणीकरणजन्ये कस्मिंश्चित्परिवर्तने न हि स्वस्वरूपस्य विलोपः । सति तु तस्मिन् स्थायिभेदप्रयोज्याया रससंख्याया एवापहारः स्यात् ।

ननु रसे सम्बन्धविशेषस्याप्रतीतेर्विभावादीनां साधारण्येन प्रतीतिरिति न हि तत्र सम्बन्धविशेषजन्यस्य दुःखस्य प्रतीतिरिति चेदुच्यते-सत्यामप्यत्र सम्बन्धविशेषस्याप्रतीतौ

न हि सम्बन्धसामान्यस्याप्रतीतिरिति तज्जन्यस्य दु खस्यावस्थानमपरिहार्यम् । लोकेऽपि पुत्रादिसम्बन्धविशेषाणाममावे शोकवृत्तेन सह सम्बन्धसामान्यस्यावस्थित्या दु खस्यावस्थानम् । न च रसे सम्बन्धविशेषाणा परिहारादौदासीन्यस्य प्रतीतिरिति वाच्यम् सर्वेशा रसाना शान्तेऽन्तर्भावप्रसगात् ।

श्री सुरजनदासस्वामिनोऽत्राचक्षते यत्काव्ये दु खस्य या प्रतीतिः सा न हि रसवर्तिनी अपितु रसास्वादानन्तर पुनरवाप्तलोकस्थितिवर्तिनी । अत एव 'योऽय स्वभावो लोकस्य सुखदु खसमन्वित । सोऽङ्गाद्यभिनयोपेतो नाट्यमित्यभिधीयते' इत्यत्र भरतमुनिना समन्वित इति पदे अनन्तरापरपर्यायस्य अनु इति पदाशस्य प्रयोग: ।[1]

अत्रोच्यते—लोकदशावर्तिनो दु खस्य रसदशाया स्वरूपविलोप , स्वरूपविलोपे च लोकदशाया तस्याविर्भाव इत्येतन्न हि अनुभवसम्मत तर्कसम्मतं चेति यथास्थितमेव साधु ।

नाट्यदर्पणकारणीना मतानुसार शृंगारहास्यवीराद्भुतशान्ता पूर्णत सुखात्मका करुणरौद्रबीभत्सभयानकाश्च दु खात्मका । भयानकादिभिरुद्विजते समाज । न नाम सुखास्वादादुद्वेगो घटते ।

अत्रोच्यते—उद्वेगो न हि काव्यानुभूतिजन्योऽपितु भयजन्य इति भयादिमात्रयोगे सत्यपि दु खस्पर्शे काव्यानुभूतौ प्राधान्येन सुखयोग एव ।

अपरञ्चैतेषु रसेषु चमत्कारस्य सद्भाव इति नाट्यदर्पणकारस्यापि सम्मतम् । चमत्कारोऽय खलु सुखापरपर्याय एवेति न हि अत्र सुखात्मकताया अभाव इत्यस्माक मतम् । नाट्यदर्पणकार पुनरित्थमाचष्टे यच्चमत्कारोऽय रसास्वादाद्भिन्न , रसास्वादविरामे चास्य प्रतीति । यथा—

"यत्पुनरेभिरपि चमत्कारो दृश्यते, स रसास्वादविरामे सति यथावस्थितवस्तुप्रदर्शकेन कविनटशक्तिकौशलेन । अनेनैव च सर्वाङ्गाह्लादकेन कविनटशक्तिजन्मना चमत्कारेण विप्रलब्धा परमानन्दरूपता दु खात्मकेष्वपि करुणादिषु सुमेधस प्रतिजानते ।"

—नाट्यदर्पण

---

१ रससिद्धान्त की शास्त्रीय समीक्षा पृ० १२

अनेन प्रतीतिद्वय नाट्यदर्पणकारस्य सम्मतमिति प्रतीयते। तत्रैका पूर्ववर्तिनी। सा च दुःखात्मिका। अपरा पुनः परवर्तिनी। सा च सुखात्मिका।

अत्रोच्यते—भवतु तावदेतदेव। परं पूर्ववर्तिनी प्रधानेत्यत्र को हेतुः। यथा वयं मन्यामहे प्राधान्यं सुखात्मिकाया एव प्रतीतेः। सैव च काव्यानुभूतिरूपा। ननु चमत्कारेण भ्रान्तिवशाद् दुःखात्मिकाया अपि प्रतीतेरानन्दरूपतया ग्रहणमित्यानन्दानुभूतेरकिञ्चित्करत्वमिति चेन्न भ्रान्तेरप्यानन्वयात्।

रसे योगः प्रतीतीनामन्यासामपि दृश्यते ।
अत्रैव ता विलीयन्ते पर्यन्तेऽतो रसस्थितिः ।। २३ ।।

सत्यानुभूतिरूपायां रसानुभूतौ पर्यवसानदृष्ट्या अनुभूतेरेकत्वमेव तथापि प्रतीतिदृष्ट्या तत्र अन्यासामपि प्रतीतीनां सद्भावस्तासाञ्च रसानुभूतौ योगः । रसानुभूतौ सत्यगतसूक्ष्मतायां भावानां योग इति प्राक् प्रतिपादितम् । भावाश्चैते कठोराः कोमलाश्चेति प्राधान्येन द्विविधाः । एकत्र चित्तस्य दीप्तिरपरत्र च द्रुतिः । एषु भावेषु एतदवस्थानुसारि स्नायुमण्डलमपि कठोरं कोमलञ्चेति द्विविधम् । स्नायुमण्डलस्यैतदवस्थाद्वयमेकतो भावजन्यमपरतश्च वर्णोच्चारणजन्यमिति भावानुकूलावस्थाजनकेषु वर्णेषु उच्चारणगतं किमपि रम्यत्वं तस्य च भावयोगः । गुणवादिनामनुसारमेषां शब्दगुणानाम् अलंकारवादिनाञ्चानुसारमेषां शब्दालंकाराणां स्थितिः । शब्दार्थौ सहितौ काव्यमित्यत्र शब्दस्य न हि केवलमर्थप्रत्यायकत्वमपितु उच्चारणरूपत्वेनार्थोपकारकत्वमपि । एतदेव चोपकारकत्वं शब्दालंकारत्वं शब्दगुणत्वं वेति रसानुभूतौ तस्य योगः ।

रसानुभूतौ सत्यगतायां सूक्ष्मतायां या प्रतीतिस्तस्यां अनेकशः सादृश्यविधानसमर्थनोपादानहेतूपादानविरोधोपादानादिभिरुपायैरुपस्थितिरित्येतेषां सादृश्यविधानादीनामप्यत्र रसोपकारकतया प्रतीतिः । सादृश्यविधानस्य या रसोपकारकतया प्रतीतिः सा इत्थम्-रसप्रसंगे मुखगतं सौन्दर्यं कवेर्वर्ण्यविषयः । अत्र सौन्दर्यं न हि सौन्दर्यसामान्यमपितु सौन्दर्यविशेषः । एष विशेष एव तद्गता सूक्ष्मता । अस्य विशेषस्य प्रकाशनाय कमलचन्द्रादीनामन्यतमस्योपमानरूपेण प्रयोगः । यथा मुखं कमलमिव, मुखं चन्द्र इवेत्यादयः । एतदेव सादृश्यविधानम् ।

कालिदासविरचितेन निम्नलिखितेन प्रसिद्धेन श्लोकेन सादृश्यस्य सत्यगतसूक्ष्मताप्रकाशकत्वेन रसोपकारकत्वं स्पष्टम्—

> सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा ।
> नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः ।।
>
> —रघुवंशम्

अत्र पतिंवरायाः इन्दुमत्याः सञ्चारिण्या दीपशिखया सह सादृश्यं, तस्य तस्य भूमिपालस्य च नरेन्द्रमार्गाट्टेन सह सादृश्यम् । तनुताऽऽभास्वरत्वादयोऽत्रेन्दुमतीगता धर्माः, विशालताविवर्णतादयश्च भूमिपालगता धर्माः । अनेन सादृश्यविधानेन न हि केवलमेतयोः

धर्माणामपितु एतद्गताया सूक्ष्मताया अपि प्रकाशनम्, तेन च चारुत्वातिशय इति स्पष्टम् ।

समर्थनोपादानादीना यत्सत्यगतसूक्ष्मताप्रकाशकत्व तन्मया काव्यसत्यालोक-शीर्षके स्वग्रन्थे निरूपितमिति नेह वितन्यते । एषा सादृश्यविधानादीनामुपमादिष्वर्था-लङ्कारेष्वन्तर्भाव इत्येषामर्थालङ्काराणामपि रसोपकारकतया प्रतीति ।

चतुर्थ उद्योत

शृंगारादिरससमीक्षणम्

वीररसमरूपा सत्यानुभूति —

प्रवृत्तिर्जीवनं लोके उत्साहश्चात्र कारणम् ।
परमोऽयमतो भावो लोकोऽखिलो यमाश्रित ।। ३४ ।।
व्याप्नोत्ययं जगत्सर्वमेकमपि बहूनपि ।
परमोऽयमत स्थायी वीरो यस्मात्प्रवर्तते ।। ३५ ।।

वीररसस्य स्थायी उत्साह इति प्राक् प्रतिपादितम् । अस्योत्साहस्य व्यक्तौ वर्गे चोभयत्र स्थितिरित्येतत्सम्बन्धिनो वीररसस्य रसान्तरेभ्य कश्चन विशेष । किञ्चास्योत्साहस्य प्रवृत्तिर्यद्यपि सहजा तथाप्यत्र प्रेरकाणामपि सद्भाव । एषु प्रेरकेषु प्राणतत्त्वस्य धर्मतत्त्वस्य राष्ट्रतत्त्वस्य च स्थिति । अन्यानि यानि तत्त्वानि तेषामत्रैवान्तर्भाव । एतत्तत्त्वानुसारं प्राणवीरो धर्मवीरो राष्ट्रवीरश्चेत्यस्य रसस्य भेदा । प्राणप्रेरितस्योत्साहस्य क्षेत्रमार्थिक जगदिति प्राणवीरस्यार्थवीर इत्यपि व्यपदेश ।

उत्साहस्याभिव्यक्तिरनेकधा—श्रमरूपेण सघर्षरूपेण युद्धरूपेण च । यत्र प्रतिरोधस्याभावस्तत्र श्रमस्याध्यवसायस्य वा स्थिति । यत्र च तस्य सद्भावस्तत्र सघर्षस्य युद्धस्य च स्थिति । समाजदृष्ट्याऽस्य सघर्षस्य युद्धस्य च क्रान्तावन्तर्भाव । सर्वत्रात्र वीरो रस । स च सत्यानुभूतिरूप ।

उत्साहवर्ती श्रमो द्विविध—शारीरो मानसश्च । अत्र शारीरे श्रमे उत्साहस्य स्फुटतेति तस्य कश्चन विशेष । किञ्च सतोऽप्युत्साहस्य यत्र गौणता भावान्तरस्य च प्राधान्य तत्र न हि वीररसस्य स्थिति । यथा शृगारादिषु रसेषु यत्र कुत्रचित् सत्यप्युत्साहे प्राधान्यं रत्यादिकस्येति तत्र शृगारादिको रस ।

संस्कृतसाहित्ये वीररसस्यानेकत्र दर्शनम् । रामायणे महाभारते चास्य सविशेषा स्थिति । कालिदासेऽपि दिलीपकृतगोसेवावर्णने पार्वतीतपश्चर्यावर्णने चास्यैव रसस्य स्थिति ।

करुणरसरूपा सत्यानुभूति -
इष्टे नष्टे भवेच्छोक सर्वत्रास्य मता गतिः ।
उत्साहोऽत्र क्षय याति करुणश्च प्रतीयते ॥ ३६ ॥

करुणरसस्य स्थायी शोक इति प्राक् प्रतिपादितम् । अस्य शोकस्य व्यक्तौ वर्गे चोभयत्र स्थिति । शोकोऽयं द्विविध –इष्ट-नाशजन्योऽनिष्टप्राप्तिजन्यश्च । यद्यप्यनिष्ट-प्राप्तौ इष्टनाशस्यापि सामान्यत स्थितिस्तथापि यत्रानिष्टप्राप्ते स्फुटा प्रतीतिस्तत्रानिष्ट-प्राप्तिर्यत्र चेष्टनाशस्य स्फुटा प्रतीतिस्तत्रेष्टनाश इति ज्ञेयम् । इष्टनाशेन शोके नैराश्य-मित्यत्रोत्साहह्रानि । इष्टमेतत्प्राधान्येन त्रिविधम्–अर्थरूपम् धर्मरूपम् व्यक्तिविशेष-रूपञ्च । अनिष्टमपि प्राधान्येन त्रिविधम्–आधिर्व्याधिर्मरणञ्च ।

रौद्ररसरूपा सत्यानुभूति — 103283

अनिष्टाज्जायते क्रोध समाजे चास्य विस्तर. ।
संघर्षस्य मतं बीज रौद्रो यस्मात्प्रवर्तते ॥ ३७ ॥

रौद्ररसस्य स्थायी क्रोध । अस्य क्रोधस्य व्यक्तौ वर्गे चोभयत्र स्थिति । वर्गेऽस्य रोष इत्यपि व्यपदेश । क्रोधोऽयमनिष्टजन्य । अनिष्टमत्रानेकविधम्–अर्थगत धर्मगत राष्ट्रादिगतञ्च । अर्थगतस्यानिष्टस्य सविशेषा स्थिति श्रमिकेषु । सा च धनिकवर्गकृता आर्थिकशोषणरूपेति श्रमिकवर्गे धनिकवर्गं प्रति रोषभावना । रोषोऽयं कर्मण प्रेरक । अनेन धनिकवर्गस्यानिष्टसम्भावनेति तस्यापि रोषाविर्भाव । अनेन रोषोऽयं वर्गसंघर्षपर्यवसायीति ज्ञेयम् ।

शृंगाररसरूपा सत्यानुभूति —
आकर्षणं महत्कान्ता रतिरत्र स्वभावजा ।
हृदयस्यात्र विश्रामः शृंगारोऽत्र प्रवर्तते ॥ ३८ ॥

शृंगाररसस्य स्थायी कान्ताविषया रति । आकर्षणसम्बन्धिषु भावेषु अस्या प्राधान्यम् । आकर्षणविषयस्य सन्निधाविव तस्य वियोगेऽप्यस्या स्थितिरित्येषा रति-द्विविधा । अनेन रसोऽयं संयोगो विप्रलम्भश्चेति प्राधान्येन द्विविध । रतिस्थायिभावस्य

जीवनगता अनेका सूक्ष्मा अवस्था इत्यनयोर्भेदयोरनेके उपभेदा सम्भवन्ति। शृंगार-रसगता रति किमपि समन्वयकारि तत्त्वमित्यनेन समाजे परिवाररूपाणां घटकानां निर्माणम्। किञ्चात्र हृदयस्य विश्राम इति समाजगते संघर्षे तत्त्वमेतद्विश्रान्तिदायकम्। अपरञ्च तत्त्वमेतन्न हि उत्साहस्य कर्मणश्च विरोधीति समाजगते संघर्षेऽप्यस्य योग-सम्भावना।

वात्सल्यरसरूपा सत्यानुभूति —

निश्छले शिशुवर्गेऽस्मिन्नात्मभाव परो मत ।
वत्सलताऽत उद्भूता वात्सल्यञ्च प्रतीयते ॥ ३९ ॥
लोके समन्वयोऽनेन परिवारस्य चोद्भव ।
हृदयस्यात्र विश्रामस्तत्त्वमिदं न बाध्यते ॥ ४० ॥

वात्सल्यरसस्य स्थायी वत्सलताभाव इति प्राक् प्रतिपादितम्। अस्य भावस्य विषयो बालक। बालके निष्कपटताया निश्छलतायाश्च स्थितिरिति तस्मिन् वत्सलता-रूपेण आत्मीयताया प्रवृत्ति। क्वचिदस्यां प्रवृत्तौ रक्तसम्बन्धजन्याया अपि आत्मीय-ताया योग। तेन वत्सलताया कोऽप्यतिशय। पुत्रादिष्वेतादृशी एव स्थिति।

शृंगारवदस्यापि रसस्य संयोगवात्सल्यं वियोगवात्सल्यञ्चेति द्वौ भेदौ, तयोश्चा-नेके उपभेदा।

वत्सलताभाव किमपि समन्वयकारि तत्त्वमित्यनेन समाजे परिवाररूपाणां घटकानां निर्माणम्। किञ्चात्र हृदयस्य विश्राम इति समाजगते संघर्षे तत्त्वमेतद्-विश्रान्तिदायकम्। अपरञ्च तत्त्वमेतन्नहि उत्साहस्य कर्मणश्च विरोधीति समाजगते संघर्षेऽप्यस्य योगसम्भावना।

हास्यरसरूपा सत्यानुभूति :—

विकृतिजो भवेद्हास आकर्षणमसंशयम्।
चित्तस्यात्र परा तुष्टिर्हास्यमत प्रवर्तते ॥ ४१ ॥

हास्यरसस्य स्थायी हास, स च विकृतिदर्शनजन्य इति प्राक् प्रतिपादितम्। अस्यां विकृतौ न हि आकर्षणस्य समाप्तिरपितु विषयोन्मुखत्वतीव्रताया केवल ह्रास इति विकृतिरेषा अनौचित्यविशेष। अनुकरणेऽपि अप्रानौचित्यस्य मनाक् प्रतीतिस्तत्र

हासस्यैव स्थिति.। हास्यरसे न हि अनौचित्यस्य रसदोषत्वेन प्रतीतिरिति हास्यरसस्य रसाभासाद्भेद ।

हास्यरसे प्रांगिकाभिव्यक्ते स्फुटतेत्येतदभिव्यक्त्यनुसार हास्यरसस्य स्मितहसितादय षड्भेदा । एषु भेदेष्वन्त प्रकृतेरपि योग परं न हि अस्या अन्त प्रकृतेरुत्तमत्वादिविभागौचित्यम् ।

हास्यरसगते हासे चित्तस्य प्रसाद इति समाजगते सघर्षे तत्त्वमेतद्विश्रान्तिदायकम् । अपरञ्च तत्त्वमेतन्न हि उत्साहस्य कर्मणश्च विरोधीति समाजगने सघर्षेऽप्यस्य योगसम्भावना ।

बीभत्सरसरूपा सत्यानुभूतिः—

> **विकर्षणे जुगुप्सा स्याच्चित्तं यत्र पराङ्मुखम् ।**
> **उत्साहो मन्दतां याति बीभत्सोऽत्र प्रवर्तते ॥ ४२ ॥**

बीभत्सरसस्य स्थायी भावो जुगुप्सेति प्राक् प्रतिपादितम् । अस्या जुगुप्साया जुगुप्साविषय प्रति पराङ्मुखतेति पराङ्मुखताभेदेन क्षोभज उद्वेगज शुद्धश्चेति त्रैविध्यमस्य रसस्य भरतादीना सम्मतम् । अत्र शुद्धभेदगतस्य भावस्य न हि औदासीन्याद् भेद इत्यस्य भेदस्यौदासीन्य एवान्तर्भावो युक्तियुक्त ।

जुगुप्सागताया विषयपराङ्मुखताया न हि उत्साहस्योन्मूलनमपितु चित्तस्यान्यत्र प्रवृत्तिरिति पराङ्मुखतापगमे उत्साहस्य पुन प्रवृत्ति ।

भयानकरसरूपा सत्यानुभूति —

> **विकर्षणाद्भयोत्पत्तिरुत्साह प्रतिरुध्यते ।**
> **चित्त भवति चाक्रान्तम् भयानक प्रतीयते ॥ ४३ ॥**

भयानकरसस्य स्थायी भावो भयम् । अत्र चेतनाया विषयाक्रान्तत्वेनोत्साहस्यावरोध । परमवरोधोऽयं क्षणिक इत्येतदपहारे उत्साहस्य पुन प्रवृत्ति ।

अद्भुतरसरूपा सत्यानुभूति —

> **विषयो लोकमत्येति स्थायी भवति विस्मयः ।**
> **चित्तञ्च मूढता याति रसोऽद्भुतः प्रतीयते ॥ ४४ ॥**

अद्भुतरसस्य स्थायी विस्मय । अत्र रागादिक्रियास्वसमर्थायाश्चेतनाया किंकर्तव्यमूढता । अत्र च कारण विषयस्य लोकोत्तरत्वम् । लोकेऽस्य लोकोत्तरत्वस्य विरलतया स्थितिरित्यस्य विस्मयावहत्वम् । किञ्च काव्ये यत्र लोकोत्तरतत्त्वाना दर्शनं तत्रानेकश प्रतीकात्मकतेति लोकोत्तरत्वस्य तया परिहार । अपरञ्च लोकोत्तरताप्यनेकत्र लोकविश्वासानुप्राणितेत्यस्या यथाकथञ्चिल्लौकिकत्वमेव ।

शान्तस्य रसत्वविवेचनम्,—

स्वभावजो रतिर्भावो हृदि सर्वस्य संस्थित ।
अभ्यासेन शमो लब्धो योगिनां हृदि संस्थित ॥ ४५ ॥
लोकोत्तरं शमे वस्तु साधारणीकृतं स्वत. ।
स्फुटे महति भेदेऽस्मिन् भेद शान्तस्य निश्चित ॥ ४६ ॥

शान्तस्य रसत्वविवेचनाय रसगताना तत्त्वानामत्र भवते समीक्षणमपेक्षितमिति तदत्र प्रस्तूयते । रसगतानि प्रमुखाणि तत्त्वानि निम्नलिखितानि सन्ति —

(१) रसस्य स्थायिभावश्चेतनाया सामान्यस्तरवर्तीति तस्य सकलसहृदयगोचरता ।

(२) स्थायिभावस्य लोकगतैर्विषयै सह सम्बन्ध ।

(३) साधारणीकरणम् ।

शान्तरसस्य स्थायिभाव शमोऽभ्यासलभ्य इति न हि तस्य सकलसहृदयगोचरता । ननु शमप्रकृतिकाना स सुलभ एवेति चेदुच्यते–विरला एवंविधप्रकृतिका । येषाञ्च नास्ति एवंविधा प्रकृतिस्तेषा सा अभ्याससाध्येति तस्या कृतेऽभ्यासस्य वैराग्यस्य चोपदेश ।

ननु जनसामान्येऽपि शमस्य यथाकथञ्चित्स्थिति , किञ्च मुनिनाऽपि क्वचित्शम इति प्रोक्तमिति चेदुच्यते–एवंविधेन मनाक्स्पृष्टेन शमेन काव्ये भावस्यैव स्थितिर्न तु रसस्येति स्वीकार्यम् । ननु शमेऽनेकत्रौदासीन्यस्यापि प्रतीतिरिति तत्र को भाव स्वीकार्य इति चेदुच्यते–शमे औदासीन्यस्यापि प्रायेण प्रतीति , औदासीन्ये च प्रायेण शमस्यापीत्युभयोर्भावयोर्यौगपद्ये प्राधान्येन व्यपदेशा भवन्तीति नयेन प्रधानस्य भावस्य स्थितिस्तत्र स्वीकार्या । ननु 'स्वं स्वं निमित्तमासाद्य शान्ताद्भाव प्रवर्तते' इति वचनानुसार

शान्तावस्थाया प्रकृतित्वेन स्थितिरिति शान्तरसस्य प्राधान्यमिति चेदुच्यते-भावाना प्रकृतिभूताया अस्याः शान्तावस्थाया वासनात्मनया स्थितात् स्थायिभावाद्भेद ।

शमस्य आत्मादयो विषया । एते चान्तरिका अलौकिकाश्च । ननु अत्राप्यादौ लौकिकानामेव विषयाणामुपस्थिति, तत्र चौदासीन्यप्रतीतिरिति चेदुच्यते-औदासीन्यमेतत् शमप्रेरितम् । शमस्य चास्य आत्मैवावलम्ब । शान्तरसस्य समर्थका वक्तु शक्नुवन्ति यद्विषयाणा लौकिकत्वमलौकिकत्वञ्चेति विभागोऽनुपपन्न इति शान्तस्य रसान्तरैस्य पार्थक्यमयुक्तम् । अत्रोच्यते-रसस्यालौकिकतामेवाश्रित्य रसानुभूतेर्लोकानुभवात्पार्थक्य भवद्भि स्वीकृतम् । यद्यलौकिकत्वमकिञ्चित्कर तर्हि रसानुभूतेर्लोकानुभवे एवान्तर्भावो विधेय । न चानुभूतिगतमेवालौकिकत्व महत्त्वपूर्णं न तु विषयगतमिति वाच्यम् ।

किञ्चानुभूतिस्वरूपे तत्प्रयोजकविषयस्वरूपस्याप्यन्तर्भाव इति विषयगतेन रूपेणानुभूतेरुपरक्तता स्वीकार्या । यद्यनुभूतिस्वरूपनिर्णये विषयगतस्वरूपप्रयोज्याया अस्या उपरक्तताया उपेक्षणम् तर्हि अलौकिकत्वाविशेषेण रसानुभूतेरात्मानुभूतावेवान्तर्भाव स्यात् ।

शृंगारादिषु रसेषु सीतादयो व्यक्तिविशेषा इति सीतात्वादिपरिहारेण तेषा कान्तात्वादिरूपेणोपस्थिति । न च शान्तरसे आत्मादिष्वेतत्सम्भवतीत्येषा साधारणीकरणस्याभाव । एषा साधारणीकरणाभावे आश्रयस्यापि साधारणीकरणाभाव । ननु व्यक्तिविशेषरूपस्याश्रयस्यात्र मुन्यादिरूपेण ग्रह इति कथमत्र साधारणीकरणाभाव इति चेदुच्यते-विभावगतमेव साधारणीकरणमाश्रयगतसाधारणीकरणस्य प्रयोजकमिति विभावगतस्य साधारणीकरणस्याभावे आश्रयस्य यो मुन्यादिरूपेण ग्रहस्तत्र न हि साधारणीकरणप्रतीतिसम्भावना । अत्र सहृदयहृदये शमस्य स्थिति । शमश्च रागद्वेषयोरभावरूप इत्यत्र रागद्वेषसम्बन्धिनोऽहंभावस्यापि शम । अहंभावे एव सम्बन्धविशेषस्वीकारपरिहारसम्भावनेत्येतद्रहितस्य शमस्य स्वरूपे एव साधारण्यस्य स्थिति । अनेन न हि अत्र रसगत साधारणीकरणम् ।

एव सति शान्तस्यात्मानुभूतौ न तु काव्यानुभूतावन्तर्भाव इति ज्ञेयम् ।

भक्ते रसत्वविवेचनम् —

लोकोत्तरा रतिर्भक्तौ भक्ताना हृदि सस्थिता ।
विषयोऽलौकिको भक्तौ साधारणीकृत स्वत ॥ ४७ ॥
साधनेयं परा ज्ञेया चित्तस्य निर्वृति परा ।
स्फुटे महति भेदेऽस्मिन् भक्तेर्भेद सुनिश्चितः ॥ ४८ ॥

भक्तिरसस्य स्थायिभावो देवादिरतिरभ्यासलभ्येति न हि तस्या सकलसहृदयगोचरता। ननु भगवद्भक्तानां सा सुलभेति चेदुच्यते-विरला एवंविधा भक्ता इति तद्व्यतिरिक्तानां सा अभ्याससाध्येति तस्याः कृते अभ्यासस्य वैराग्यस्य चोपदेशः। ननु जनसामान्येऽपि भक्तेर्यथाकथञ्चित्स्थितिरिति चेदुच्यते-एवंविधया मनागस्पृष्टया भक्त्या काव्ये भावस्यैव स्थितिर्न तु रसस्येति स्वीकार्यम्।

भक्तेर्देवादयो विषयाः। एते चान्तरिका अलौकिकाश्च। ननु विषयाणां लौकिकत्वमलौकिकत्वञ्च रसत्वनिर्णयेऽकिञ्चित्करमिति चेदुच्यते-रसस्यालौकिकतामेवाश्रित्य रसानुभूतेर्लोकानुभवात् पार्थक्यं भवद्भिः स्वीकृतम्। यद्यलौकिकत्वमकिञ्चित्करं तर्हि रसानुभूतेर्लोकानुभवे एवान्तर्भावो विधेयः। न चानुभूतिगतमेवालौकिकत्वम् महत्त्वपूर्णं न विषयगतमिति वाच्यम्।

किञ्चानुभूतिस्वरूपे तत्प्रयोजकविषयस्वरूपस्याप्यन्तर्भाव इति विषयगतेन रूपेणानुभूतेरुपरक्तता स्वीकार्या। यद्यनुभूतिस्वरूपनिर्णये विषयगतस्वरूपप्रयोज्याया अस्या उपरक्तताया उपेक्षणं तर्हि अलौकिकत्वाविशेषेण रसानुभूतेरात्मानुभूतावेवान्तर्भावः स्यात्।

शृंगारादिषु रसेषु सीतादयो व्यक्तिविशेषा इति सीतात्वादिपरिहारेण तेषां कान्तात्वादिरूपेणोपस्थितिः। न हि भक्तिरसे देवादिष्वेतत्सम्भवतीत्येषां साधारणीकरणस्याभावः। एषां साधारणीकरणाभावे आश्रयस्यापि साधारणीकरणाभावः। ननु व्यक्तिविशेषरूपस्याश्रयस्यात्र भक्तरूपेण ग्रहः इति कथमत्र साधारणीकरणाभाव इति चेदुच्यते--विभावगतमेव साधारणीकरणमाश्रयगतसाधारणीकरणस्य प्रयोजकमिति विभावगतस्य साधारणीकरणस्याभावे आश्रयस्य यो भक्तरूपेण ग्रहस्तत्र न हि साधारणीकरणप्रतीतिसम्भावना। अत्र सहृदयहृदये भक्तेः स्थितिः। भक्तौ च लोकगतरागद्वेषयोरभाव इत्यत्र रागद्वेषसम्बन्धिनोऽहंभावस्याप्यभावः। अहंभावे एव सम्बन्धविशेषस्वीकारपरिहारसम्भावनेत्येतद्रहिताया भक्तेः स्वरूप एव साधारण्यस्य स्थितिः। अनेन न हि अत्र रसगतं साधारणीकरणम्।

एवं सति भक्तेरात्मानुभूतौ न तु काव्यानुभूतावन्तर्भाव इति शेषम्। किञ्च 'भगवान् परमानन्दस्वरूपः स्वयमेव हि। मनोगतस्तदाकारो रसतामेति पुष्कलम्' इत्युपादानेन श्रीमधुसूदनसरस्वतीमहाभागैर्भक्तेरात्मानुभूतिरूपतैव स्वीकृता।

भक्तेर्मधुरादयोऽनेके प्रकारा आलंकारिकैः स्वीकृताः, तत्र भावान्तराणामपि योगः। यथा मधुराभक्तौ रतिभावस्य योगः। भावस्याप्यलौकिकत्वे भक्तिपर्यवसायित्वे

च भक्तेरेव पार्यन्तिकी प्रतीतिः, लौकिकत्वे च शृंगारस्यापि तत्र स्पर्शः । सख्यदास्यवात्सल्यादिभक्तिप्रकारेषु सख्यादीनां भक्तिपर्यवसायित्वे भक्तिभावस्य पार्यन्तिकी प्रतीतिः, अन्यथात्वे च सख्यादीनामपि भावानां प्रतीतिस्तत्र स्वीकार्या ।

पञ्चम उद्योत

रसगतदोषसमीक्षणम्

रसे सर्वं मत सत्यम् सत्ये तस्मिश्च सूक्ष्मता ।
एव भवेद्रसास्वादोऽन्यथा दोषस्य विस्तर ॥ ४९ ॥

सत्यानुभूतौ सत्य तद्गता सूक्ष्मता चेति द्वे तत्त्वेऽपेक्षिते इति रसानुभूताव-प्यनयो स्थिति । अनेन तत्त्वयोरनयोरन्यतरस्योभयोर्वा यथासम्भवमभावे रसे दोषस्य स्थिति । सा च प्राधान्येन चतुर्धा—असत्यताप्रतीतिरूपेण सत्यगतस्थूलतारूपेण सत्यगत-सूक्ष्मताया न्यूनतारूपेण स्फुटताविरहरूपेण च । अत्र असत्यताप्रतीति पुनर्द्विविधा-सम्भावनाविरहरूपा सशययोगरूपा च । सम्भावनाविरहरूपो यो दोषस्तत्र पात्रादि-विचारोऽप्यपेक्षित । अत्र चाय हेतुर्यत्काव्ये व्यवहारादीना यदुपादान तत्पात्रविशेषगत-त्वपूर्वकमिति पात्रविशेषगतत्वेन तेषा सम्भावनाया न हि अस्य दोषस्याविर्भाव । यथा समुद्रलघनादीना रामादिगतत्वेनोपादान न हि असम्भवमित्येवविषयवर्णनेऽस्य दोषस्या-भाव ।

अनेनैव प्रकारेण देशकालादिविशेषगतत्वेन व्यवहारविशेषस्य सम्भावनाया न हि अस्य दोषस्याविर्भाव । द्रौपदीगतस्य पञ्चपतिविषयकस्य वर्णने एतादृशी एव स्थिति । यत्र तु सत्यपि पात्रदेशकालादिकविचारे वर्ण्यव्यवहारस्य सम्भावनाविरहस्तत्र दोषोऽयमक्षत इति ज्ञेयम् । उत्साहस्य भीरुगतत्वेन वर्णने गुरुविषयकक्रोधस्य शिष्यगतत्वेन वर्णने जनसामान्यगतायाश्च रतेरुत्तमदेवतागतत्वेन वर्णने एतादृशी एव स्थिति । अनेन 'प्रकृतीना विपर्यय' इत्येवरूपो यो रसदोष आलकारिकै परिगणितस्तस्यात्रैवान्तर्भाव इत्यायातम् ।

सत्यगता स्थूलता—साधारणीकरण सत्यगतसूक्ष्मतापेक्षमिति सत्यगतस्थूलता-दशाया साधारणीकरणस्याभाव । अनेनात्र दोषस्याविर्भाव इति स्पष्टम् । स्वगतत्व-

नियमेन परगतत्वनियमेन च देशकालविशेषावेश इत्येवंरूपो यो रसविघ्नोऽभिनवेन परिगणितस्तत्र सूक्ष्मताभावेन साधारणीकरणाभाव इति तस्यात्रैवान्तर्भाव । किञ्च निजसुखादिविवशीभाव इत्येवंरूपो यो रसविघ्नोऽभिनवेन परिगणितस्तस्य सत्यगतसूक्ष्मतापादनेन परिहार इति तस्याप्यत्रैवान्तर्भावो ज्ञेय ।

सत्यगतसूक्ष्मताया न्यूनता — पशुपक्षिगताया रतौ नरनारीगतरत्यपेक्षया सूक्ष्मताया अभाव इत्यत्रास्य दोषस्याविर्भाव । न हि पशुपक्षिगतभयवर्णने एतादृशी स्थितिरिति तत्रास्य दोषस्याभाव । अनेकान्तविषयाया रतौ अनुभयनिष्ठायाञ्च रतौ सूक्ष्मताया क्वापि हानिरित्यत्रायमेव दोषो विज्ञेय । व्यभिचारिरसस्थायिभावाना स्वशब्दवाच्यतायामप्येतादृशी स्थितिरिति स्पष्टम् ।

स्फुटताविरह —काव्ये सत्यस्य यन्निरूपणं तत्र सत्यमपि सूक्ष्मताया स्फुटता अपेक्षिता इत्यस्या अभावे स्फुटताविरहरूपस्य दोषस्याविर्भाव ।

काव्यगते सत्ये समग्रतादृष्ट्या यद्यप्येकत्वस्य प्रतीति स्तथापि भेददृष्ट्या तदानेकत्वप्रतीतेरपि सम्भावना । अस्यामनेकत्वप्रतीतौ अनेकेषु सत्येषु सम्बन्धस्यान्वयस्य वा प्रतीतिरित्येतस्य प्रतीतिरावश्यकता । सम्बन्धाभावे एकत्वप्रतीतेर्भङ्ग इति दोषस्याविर्भाव । प्रतिकूलविभावादीना न हि प्रस्तुतेन सम्बन्ध इति तेषा ग्रहे सम्बन्धाभावाद् दोषस्य स्थिति । अकाण्डे प्रथनेन अकाण्डे छेदनेन चापि सम्बन्धस्य भङ्ग इत्यत्रापि दोषस्य स्थिति । अनङ्गस्याभिधानमित्येवंरूपो यो दोष आलंकारिकै परिगणितस्तत्राप्ययमेव हेतु ।

काव्ये अन्वितेषु सत्येषु एवमङ्गि अन्यानि च तदङ्गानि । यस्याङ्गिता तस्य प्राधान्यमिति तत्सिद्धये तस्य यथावसरमनुसन्धानमपेक्षितम् । एतदभावे दोषस्य स्थिति स्वीकार्या । अनेनैव कारणेन अङ्गिनोऽननुसन्धानमित्यस्य दोषपदवाच्यता ।

काव्ये यस्य सत्यस्याङ्गत्वेन स्थितिस्तस्य गौणतेति तस्य विस्तारोऽनुचित । अनेनैव हेतुना अङ्गस्याप्यतिविस्तृतिरित्यस्य दोषपदवाच्यता ।

काव्ये सत्यस्य स्थिति प्रायेण पात्रादिगतत्वेन भवतीति यस्मिन् पात्रे सत्यान्तर्गतस्य भावविशेषस्य स्थितिर्न हि तस्मिंस्तद्विरुद्धस्य भावविशेषस्य सन्निवेशो विधेय, अन्यथा प्रकृतिविपर्ययसम्भवाद् दोष स्यात् ।

First Udyota

Description of Truth

I first pay my obeisance to the labour and then to the labourer, because it is labour alone which in the form of the labourer sustains the world [1]

Having paid my obeisance to *Dhvanikara*, the author of *Dhvanyaloka* (who spread the light of *Dhvani*) I with the blessings of *Vidyadhara* (name of my preceptor) proceed with the writing of *Rasaloka* (spread the light of Rasa theory) [2]

I am neither gifted with extraordinary faculty, nor have I a proficiency in speech But I donot believe in appearance, so truth is my only recourse [3]

Truth is liked by all, so subtlety in this leads to excellence In scriptures it is termed as knowing, while in poetry it is termed as experience [4]

